(1061)　गङ्गाभक्तितरङ्गिणी ... पत्रा ...

गंध
गंगा
भक्ति
तरंग
णीप
त्र.५.२

॥शिवः सर्वम्॥ रूपे सा सा ध्यात्मैशं द्रवत्वं पुञ्जीभूतं सर्वगीर्वाणतेजः व्यक्तीभूतं ब्रह्मविघ्नन्निहन्त्या दारं नेस्मिन् गंगमं नो स्मदीयम्
सद्धिर्द्वौ कुलयोर्विशयमखिलं विज्ञाय मान्यौ ददौ वृत्तिं यस्य यशो नाम ह्यायनिखिलं भूमंडलो खंडलः श्रीवीरेश्वरसूनुरन्वहमसौ
वन्यस्यनाहं मतं गंगाभक्तितरंगिणीं गणपतिर्व्रतेमतां प्रीतये २ प्रमाणमात्रे प्रथममेवास्यात दनंतरं ततः प्रयोगः संक्षेपान्नरं
गभूपस्य वर्णितम् ३ तत्रादौ प्रनवप्रकरणेन ततः प्रभृति सा ब्रह्मन् सर्वपापहरा सरित् गंगा दिवं गनीं गानाम अनुलेपनयिं नरा।
प्लावयंतीं निडुमंडलं समंताद्बहुलाः पुर्या गंगा पतति चेदिवि। सा तत्र पतिता दिक्षु चतुर्द्धा प्रत्यपद्यत। तसिता चैलकनंदा च वंक्षु
र्भद्रा च वैक्रमात् महाभारते महापुण्या च गगनात् पतंतीं वै महेश्वरः दधार शिरसा देवीं तामेव दिविसेवते ५ ब्रह्मपुराणे
पश्चाद्दौ कृष्णपक्षे तु भूमौ सन्निहिता भवेत् यावत्पुनरमावास्या दिनानि दश नित्यशः ६ शुक्लप्रतिपदमारभ्य दिनानि दश संख्यया
पाताले सन्निधानं तु करोति स्वयमेव हि ७ शुक्लैकादशका दीनि गंगा स्वर्गतरंगिनी पंचम्यंतानि सा स्वर्गे सदा सन्निहिता भवेत्
८ पश्चाद्दौ भूमावधिकं फलमिति भावः बृहन्नारदीये आत्मघातकपाप्मानो राजन् नरस्तर्पयिता महाः वसंति नरके तेन दग्धाः क
पिलकोपतः ९ तानुद्धरं महाभागा गंगाजलनिषेवणे गंगा सर्वाणि पापानि नाशयत्येव पंडित। १० केशं वास्थि नरवं दंतं भस्म
वापि जनेश्वर गंगायां स्पर्शमात्रेण तान्नयं त्यच्युतं पदं ११ यानि कानि च पापानि घोराक्कानि तव पंडित तानि पापानि नशंति गंगा
बिंदु निषेकतः १२ इत्यादियमवचनमाकर्ण्य जटाचीरधरो महति तपसि वर्त्तमानो राजा भगीरथो हेमाद्रिं प्रतिगच्छन् १३ गोरी
वरी तीरं विष्णुमाराधयेति भृगुणोपदिष्टो भगवंतमाराधयेत् त्र्यंबकमाराध्याभीष्टं शाप्यसीति लड्ड वरं श्रेणी क्षिति भगवतो महेश्व
नोक्तं राजोवाच अनुग्राह्योस्मि यदि ते वरदानं महेश्वर त्रिमार्गगा प्रदानेन उद्धरास्मत्पितामहान् देवदेव उवाच तव

12" 16"

गं॰ त
त॰ णी
१

दत्तामयागंगातेषांचैवपरागतिः तवमोक्षवरंदत्तमित्युक्त्वांतर्दधेशिवः कपर्द्दिमुकुटेन्यस्तागंगालोकैकपावनीपावयंतीजगत्स
र्वमन्वगछद्भगीरथं ततःप्रभृतिसावत्सेन निर्मलामलहारिणी भागीरथीतिविख्यातासर्वलोकेषुपंडितः सगरस्यात्मजाःपू
र्वयत्रदग्धामुनीश्वराः तद्देशंप्लावयामासगंगासर्वसरिद्वरा॰ यदासंप्लावितंतस्मसागराणांतुगंगयातदैवनरकेमग्नासागरा॰
त्मजातेनसः पुरासमुह्यमानेनयमेनपरिनिंदिताः तएवपूजितास्तेनगंगाजलपरिप्लुता॰ गतपापमान्सविज्ञाययमस्तान्सागर॰
संभवान् प्रणम्याभ्यर्च्यविधिवदित्याहविनयान्वितः यमउवाच भोभोराजसुतायूयंनरकान्निशदारुणान् एतावंतंतुसमय
मुक्कवतः स्वकर्मभिः धन्यस्त्वदन्वये जातोभगीरथइतिश्रुतः ततोस्मात्तारितायूयंनरकाद्भृशदारुणात् आरुह्याशुविमाना॰
निसर्वे मानान्वितानिच गछध्वंविष्णुभुवनंसर्वलोकोत्तमोत्तमं॰ इत्युक्तास्तेमहात्मानोयमेनगतकल्मषाः शतकोटिकुलैर्यु॰
क्ताविष्णुलोकंप्रापदिरे: एवंभगवासागंगाहरिपादाग्रसंभवा सर्वलोकेषुविख्यातामहापातकनाशिनी॰ ब्रह्मांडे महारुद्र
स्यायाशंभोरुत्तमांगोद्भवाशिवा विनिःसृतामहानंदादक्षिणेदक्षणमुना त्रिविक्रमपदोद्भूताब्रह्मांडसुविरोद्भवा पुराविष्णुप
दीगंगासमुद्रापूर्त्तिकारिणी मत्स्यपुराणे क्षितौतारयतेमर्त्यान् नागांस्तारयतेप्यधः दिविस्तारयतेदेवांस्तेनत्रिपथगा॰
स्मृता नविद्ये सर्वेश्वरस्ययाशांतामूर्त्तिरिहासनातनी त्रैलोक्यपावनार्थायदययाधरणीगता अथभक्तिप्रकर्ण ॥
तत्रवैदिककर्ममात्रेभक्तिश्रद्धेवशंकर्त्तव्येतथाहि पद्मे अग्न्युद्ध्याहृतंसर्वंकृतंयत्पारलोकिकं अभक्त्याचतथावै॰ राम
रूपनावाप्नुयातथाकृतं आराध्यत्वेनज्ञानंभक्तिः आराधनाचगौरवोचितप्रीतिहेतुक्रियावेदादिबोधितफलावश्यंना १

वनिश्चयाश्चश्च। शुचित्वेनस्वज्ञानंभावशुद्धिंहतेफलाजनकं अतोगंगाभक्तिःप्रतिपाद्यते तथाहिस्कंध ब्राह्मयोःसमात्‍
पितृदारसणांकुलकोटिमनंतरं गंगाभक्तिस्तारयतिसंसारार्णवतोध्रुवम् अनंतरंकुलकोट्यधिकमपि चिदनंतरमितिपा
ठः तत्रानंतकंभावधृतइत्यन्वये संतोषःपरमैश्वर्यंतत्वज्ञानशुभात्मता विमलाचारसंपत्तिर्गंगाभक्त्यासजायते कृतरू
त्पानवेन्म र्यो गंगां प्रत्येवकेवलां तद्भक्तस्तत्परस्वेत्स्यात्सुकृतएवनसंशयः भक्त्यातज्जलयंकानितज्जलंसेवतेतुयः अ
नयासेनहिनरोमोक्षोपायंसविंदति। विष्णोःपरंपदंप्राप्तःपुंसांयज्ञाययत्फलंगंगांप्राप्यतथास्पृष्ट्वातत्फलंभक्तितो
भवेत् परंयत्फलमि त्यन्वयः यज्ञाययज्ञनिमित्तंयज्ञप्रवृत्त्यर्थमित्यर्थः तथाअन्यत्र नास्तिकःकामीकिल्बिषीवेदनिंद
कःकुहकोहेतुनिष्ठश्चनगंगाभक्तिमाप्नुयात् कामीवेदनिषिद्धकामनावान् किल्बिषीमिष्टान्नपानादिनास्वमात्रोदरंभरिः
कुहकोऐंद्रजालिकःहेतुनिष्ठोमूलक युक्त्यावेदनिषिद्धाचारः तथा गंगांतुभक्तिचारेणसेवतेयस्तुमानवः सकोटिकुल
मुत्सृज्यस्वर्गलोकेमहीयते। जन्मांतरकृतैर्दानैस्तपोभिर्नियमादिभिः इहजन्मनिगंगायांभक्तिरुत्पद्यतेनृणां निर्धूत
मलपंकानांस्वभावामलचेतसां परलोकेच्छीलानां नास्तिकानांहतात्मनां श्रुतिस्मृतिपुराणार्थदृष्टिविभ्रंशनवेत्सागंगा
यांजायतेभक्तिरित्येवंवसवोब्रुवन्। नास्तिकोत्रनिर्ममः स्वधर्मंयपरित्यज्यपरधर्मरतिर्नरः सचौरस्तस्यगंगायांभक्ति
र्नैवोपपद्यते तथा शठाश्चमानिनःक्रूरानास्तिकाक्रोधनाः खलाअसूयकाःकुतर्काश्चगंगाभक्तेर्नभाजनं नास्तिको।
वोद्धविशेषः तथा नैवारात्मवादनिपुणोभिव्यक्तसांगंगाहेतुकानगंगाभक्तिविहीनोश्च वाङ्मात्रेणापिनार्चयेत् गंगायां

गं·न· वैष्णवीशक्तौपरंब्रह्मविनावनंनकुर्वंतितुयेभक्तिं(न)रतैःसहतुसंवदेत्॥ अथगंगाभक्तिहीनान्याह दर्शनहेतुकान् गंगाभ
त·प्री क्तिविहीनांश्चवाङ्मात्रेणापिनार्चयेत्· गंगायांवैष्णवीशक्तौपरंब्रह्मविनावनंनकुर्वंतितुयेभक्तिं कुःश्लेष्मास्रङ्मूत्रमं
२ चयमुष्टिरहंनक्षिपेच्चापिस्वहस्तैर्नचताडयेत्। नारायणंभवंचापिननिंदेच्चप्रपूजयेत् गंगाभक्तेषुवात्सल्यंगंगासेवानुमो
दनम्· गंगायाःदर्शनंस्पर्शं(स्नान)जलपानादिकंतथा गंगाकथायांप्रीतिश्चकुर्याद्गंगांसदास्मरेत्· एवमादिव्रतान्याहुर्गंगाभ
क्तस्यसूरयः भक्त्यागंगावगाहस्यफलंवक्तुंनशक्यते· स्वर्गमोक्षौफलेतस्यएवमाहुर्महर्षयः तथा वक्तुदोषंमहादुःखंज्ञा
त्वामानुष्यमध्रुवंज्ञात्वाकलियुगंघोरंगंगाभक्तिश्चगोपिताः गंगांनोभक्तितोनित्यंपूजयेत्प्रीतिपूर्वकं तत्क्षेत्रमुक्तासिद्धाश्च
तेषांब्रह्मक्षौफलंपरं॥ अथभक्तिविघ्नप्रकरणं॥ तत्रभविष्यत्पुराणे षष्टिर्विघ्नसहस्राणिगंगांगारक्षंतिसंततं निवारयंत्य
भक्तांश्चपापकर्मरतान्यतः कामक्रोधमहालोभमोहादिनिशितैः शरैः घ्नंतियेषांमनस्तत्रस्थितिंवैनाशयंतिच। गं
गाभजनविघ्नास्तेभक्तानांविनिहंतिच नियोगाद्देवदेवस्यतेवैघ्नंतिविनायकाः कुतइत्यस्यकोक्षायांदेवदेवस्यनि
योगात्घ्नंतीतिपुनरनुवादः॥ अथाभिलाषप्रकरणं॥ भविष्ये कदाद्रक्ष्यामितांगंगांकदास्नानंलभेमहि इतिपुंसामभि
लाषताकुलानिदर्शनाप्रणत्॥ कालिकापुराणे॥ वाञ्छंतिदेवतानित्यंमानुष्यंप्राप्नुयामहेसम्यक्श्रद्धालवश्चैवगंगास्ना
नंलभेमहि॥ अथस्मरणं सहस्रेयोजनस्याश्चगंगांभक्त्यास्मरंतिये गंगागंगेतियेब्रूयुर्मुच्यंतेतेपिपातकैः हरिवंशे॥ राम
दिव्यादेवनमस्कार्यापुण्यात्रिपथगानदी समरणादेवसर्वेषामघसंघविनाशिनी ब्रह्मांडे मनसासंस्मरेद्यस्तु। २

गंगाद्वारिस्थितो नरः चांद्रायणसहस्रं तु लभते नात्र संशयः भविष्ये भुवनानि विचित्राणि विचित्रा नरणस्त्रियः
आरोग्यं वित्तसंपत्तिर्गंगास्मरणजं फलं॰ क्रोधेन च तपस्तद्वत्कामेन च यथा मतिः मत्सरेण यथा लक्ष्मीर्दंभेन कौटिल्यम
यानिर्दयया धर्मो विनश्यति तथा नश्यंति पापानि गंगायाः स्मरणेन च ये स्मरंति च वै गंगां गंगानक्तिध्रियाश्च येतेप्यशेषै
र्महापापैर्मुच्यंते नात्र संशयः गच्छंस्तिष्ठन्स्वपन्जाग्रत्ध्यायन्भुंजंश्वसंस्मराम्नायः स्मरेत्सततं गंगां सोपि मुच्येत बंधनात
॥ब्रह्मांडे॥ यत्र यत्र स्थितो वापि मरणे समुपस्थिते नकृपागंगांस्मरन्याति नरः शिवपुरं परं॰ स्मरणादेव गंगाया पापप
संघातपंजरं तेदं सहस्रधा यातिगिरिवज्रहतो यथा॰ अथ कीर्त्तनं॥ भविष्ये दर्शनात्स्पर्शनात्पानात्तथा गंगेति की
र्त्तनात् स्मरणादेव गंगायाः सद्यः पापैः प्रमुच्यते॰ वैष्णवे गंगा गंगेति यो ब्रूयाद्योजनानां शतैरपि स्थितैरुच्चारितं हंति
पापं जन्मत्रयार्जितं अलं दानेन विप्रेंद्राः श्रुतेनाध्ययनेन च इदं वः स्वर्गसोपानं गंगा गंगेति कीर्त्तनं॥ ब्रह्मांडे सप्ताव
रान्सप्तपरान्पितॄन्नतेभ्यस्तथापरान् गंगा तारयते पुंसां प्रसंगेनापि कीर्त्तिता॰ अश्रद्धयापि गंगाया यो सौ नामानुकीर्त्त
नं करोति पुण्यवाहिन्याः स वै स्वर्गस्य भाजनं॰ तथा गंगेति कीर्त्तिना देवसद्यः पापात्प्रमुच्यते॥ नारदीये सर्वावस्थांग
तो वापि सर्वधर्मविवर्जितः गंगायाः कीर्त्तनाद्देव शुभां गतिं प्रयात्॰ गंगा गंगेति येनाम त्रिसंध्यं त्रिरुदाहृतं सुदूर
स्थेश्च यत्पापं हंति जन्मत्रयार्जितम् आग्नेये यो गृहे वर्त्तमानोपि त्वां स्नानात्कीर्त्तयिष्यति सपास्यति दिवं नित्यमि
त्याह वरुणश्चतान्॰ गंगां भगीरथी पुण्यां श्रद्धया प्रवदन्नरः योजनानां शतस्थोपि मुच्यते सर्वकिल्बिषैः॥ सह
स्रये जनस्थोपि त्रिसंधिं सुसमाहितः गंगा गंगेति यो ब्रूते स याति परमां गतिं॥ स्कांदे ॥अलक्ष्मीः कालकर्णी च दुःस्वप्नं दुर्विचिंति

नंगंगातिसंहृष्टमाकल्पंनक्षयंत्येतानिवैध्रुवं॥ अथयात्राप्रकरणं॥ स्कंदे॥ योगन्तुद्धिंशुभांदेवाः श्रयच्छेतिमहात्मनां तिथिगच्छंति
सततंगंगामनिमितांवरैः मनुः यमोवैवस्वतोराजायस्तवैषहृदिस्थितः तेनचेदविवादस्तेमागंगांमाकुरून्गमः नविष्ये गङ्छ
च्छेद्दिवृधागंगांज्ञात्वाविश्वमसाश्वतं सघोरेचकलौप्राप्तेमुक्तिर्वावांछितायदि॥ दानधर्मे॥ गंगांगतायेत्रिदिवंगतास्ते॥ अथप्रसंसा॥
॥नविष्ये॥ वृथाकुलंवृथाविद्यावृथायज्ञावृथातपः वृथादानानितस्येहकलौगंगांनयातियः॥ गंगास्नानसमायुक्तोविधिनास्वगृ
हान्नतः निर्गतिर्यिमध्येचनरः कुदेशेमृयतियदि गंगास्नानफलंसोपिनियंतात्माफलेलनेत्॥ गंगास्नानसमायुक्तोगंगास्नानोद्यतः॥
सदाविनाययथोक्तप्रकारेणलभ्यतेपरमांगतिं॥ वाराहब्रह्मांडयोः अर्घादिकंगृहीत्वातुसंकल्पादेवासमासते। आगच्छेतिकदेत्यार्यो
गंगामनुगतान्नराः स्कंदे क्रंदंतिसर्वपापानिसंक्रांताः सर्वपातका अनिष्टानिपलायंते गंगास्नानोद्यतस्यवैः अनुषंगेन संगे
नवाणिज्येनचसेवया कामासक्तोपिदिव्हिनरोगंगांप्राप्यदिवंव्रजेत्॥ नविष्ये॥ बहुनात्रकिमुक्तेनगंगायांश्चैवनक्तिनः मत्हापति
कंन्येयेचगमनात्ब्रह्मलोकगाः॥ ब्राह्मे॥ स्नानंतुनस्यगंगायाकर्तुकामस्यगच्छतः पदेपदेश्वमेधस्यफलंप्राप्नोत्यसंशयः॥ नवि
ष्ये॥ तेषांनपरिवर्त्तोस्तिकल्पकोटिशतैरपि। येपुनस्त्यक्तदेहाश्चगंगांध्यायंतियांतिच गंगास्नानंकरोमीतिमनसायस्तुचिंतयेत्॥ अ
संक्तश्चस्वयंगंतुंसामर्थ्यीयस्यनास्तिच सतयाश्रद्धयानत्त्याविमुक्तः सर्वपातकैः॥ ब्रह्मलोकंसमाप्नोतिदेहांतेनात्रसंशयः॥ जैग
च्छेतिस्वतोगंगांपरांश्चप्रेरियंतियेद्विः हतेसर्वनोगानामंतेज्ञानस्यभाजनं॥ शंख तीर्थप्राप्यानुषंगेनस्नानंतीर्थेसमाचरन्॥ स्नाने
जंफलमाप्नोतिनतीर्थयात्राफलंनतु वाणिज्याद्दौतीर्थयात्राप्राप्तेयात्राफलंननवतीतिगणेश्वरः॥ पैठीनिसि॥ षोडशांशंसल
नंतेयः परान्नेनगच्छति॥ अर्द्धंतीर्थफलंतस्ययःप्रसंगेनगच्छति॥ यानेनगमननिषेधः॥ ऐश्वर्यमदमोहेनयस्तु यानंसमाचरेत्
निष्फलंतस्यतीर्थंतस्माद्यानंविवर्जयेत्॥ इतिमत्स्यपुराणीयवचनस्य॥ प्रयागनात्राप्रकरणस्नानातुएस्वर्यमदमूर्निते। प्रयागग।

गमनेतिदोषाभावः ऐश्वर्यमदमोहेनेतिविशेषोक्तेः तथाच गोयानेगोवधःप्रोक्तः हययानेचनिष्फलं। नरयानेतदर्द्धंस्यात्पद्भ्यांतच्चचतुर्गुणं
एतदपिप्रयागगमनेमेव॥ अईदूरतिपादुकेतिश्रमप्राशस्त्यकमितिहृद्याः ब्रह्ममात्स्ययोः यःकश्चित्तुतीर्थयात्रांगच्छेत्सुसंयतः सदा। सचपूर्वंगृ
हेकृतोपवासःशुचिःप्रयतः संपूजयेद्भक्त्यागणेशंदेवान्पितॄन्ब्राह्मणांश्चसाधून्पितॄन्किंतुशक्त्याप्रयत्नात्तुप्रत्यागम्यदेवान्पितॄन्ब्राह्म
णान्प्रपूजयेच्च॥ एवंकुर्वतस्तस्यतीर्थाद्युक्तंफलंतत्स्यान्नसंदेहः कश्चिदाशास्तेदेवान्पितॄनितितीर्थयात्रांकरिष्यमाणस्यदेवपितृब्राह्म
णपूजनमावश्यकं। पितॄन्विचिंत्यशक्तोनिधनात्तु अधनेनापिपूजनंविशेषतः॥ कर्त्तव्यमितिविनिधीयते शक्तिश्चदशगाः दशदानेनसं
पूर्णामेकांचदशगुर्दद्यात् दशदद्याद्गोशतं शतंसहस्रगुर्दद्यात्एवंधर्मोनहीयते॥ इतिसमानन्यायादिगणेश्वरः नविष्ये गच्छंदेशांतरंय
श्राद्ध स्तुसर्पिषायात्रार्थमितितत्प्रोक्तंप्रवेशोचनसंशय॥ एवंचयात्रांगशुद्धेद्वयंघृतमेवज्ञेयं॥ महाभारतेशंखस्मृत्योश्च॥ यस्यहस्तौचपादौ
चमनश्चैवसुसंयतं विद्यातपश्चकीर्त्तिश्चसतीर्थफलमश्नुते हस्तसंयमनंअदत्तदानादिनिवृत्त्यापदसंयमनंअगम्यदेशगमननिवृत्त्यो
मनःसंयमनंकुशकल्पनिवृत्त्या विद्यात्तीर्थगुणादिज्ञानं सूक्ष्मदीनामपिगमनोपदेशात् तपश्चतीर्थोप[illegible]पासनादिलक्षणं
कीर्त्तिश्चस्वच्छत्वादिनप्रसिद्धिः अकल्कोनिरालंबोलघ्वाहारोजितेंद्रियः विमुक्तःसर्वसंगैर्यःसतीर्थफलमश्नुते॥ अकल्कोदंभर
हितनिरालंबोजनादिव्यापाररहितः संगोत्रविहितासक्तिः एतच्चहस्तसंयमनादितीर्थयात्रांगे भारते तीर्थयात्रामुपक्रम्याभि
धानात्स्नानादिकर्मांगमपिशंखेनयात्राप्रकरणंविनैवतीर्थफलमश्नुतइतिसामान्याभिधानात् वायुपुराणे अश्रद्दधानाः
पापात्मानास्तिकोच्छिन्नसंशयः हेतुनिष्ठश्चपंचैतेनतीर्थफलभागिनः महाभारते कामंक्रोधंचलोभंचयोजित्वातीर्थमाविशे
त् नतेनकिंचिदप्राप्तंतीर्थाभिगमनाद्भवेत् तीर्थान्यनुयथोक्तेनविधिनासंचरंतियेसर्वद्वंद्वसहाधीरास्तेनराःस्वर्गगामिनः सर्व
द्वंद्वसहाःशीतातपादिक्लेशसहिष्णवः भारते अग्निष्टोमादिभिर्यज्ञैरिष्ट्वाविपुलदक्षिणैः नतत्फलमवाप्नोतितीर्थाभिगमनेनयत्॥

ब्रह्मपुराणे सर्वेनगांगेनजलेनसम्यकूमृत्पर्वतेनापि नावदुष्टः आजन्मनः स्नानरतोपिनित्यंनशुध्यतीतोचवयंवदामः मृ
४ त्तिकापर्वतेनापिनशुध्यतीत्यर्थः ४ मत्स्यादेवालयेपक्षिगणाश्चनित्यंभावोज्झितास्तेनफलंलभंतेतीर्थाच्चदेवायतनाच्चमुख्यात्
गं०भ० भावात्ततोहृत्कमलेचशुद्धंविधायतीर्थानिसेवेतसमाहितात्मा याकाचित्तीर्थयात्रामुनिंद्रैःकृताप्रयुक्ताप्यनुमोदितावा तांब्रह्मचा
त० रीविधिवत्करोतिसुसंयुतोगुरुणासंप्रयुक्तः। एवंचतीर्थयात्रादौभावादिशुद्धिरावश्यकमितिमंतव्यं मनस्कंदमत्स्यपुराणेषुः क्रोधलो
नेककर्तीनांविपरीतक्रियावतांकामिनांचतथान्यव्रतपोयज्ञादिभिःफलं गंगायांतत्कृतंसर्वंसफलंनात्रसंशयः नविल्ले ॰ श्रद्धाधर्मः
परःसूक्ष्मश्रद्धाज्ञानंपरंतपः श्रद्धास्वर्गश्चमोक्षश्चश्रद्धयाचप्रसीदति। परब्रह्मस्वरूपायागंगायाश्चस्वभावतः ब्रह्मांडे सर्वभावाविशु
द्धोपिगंगायांकुरुतेचयत् संपूर्णफलमाप्नोतिहेलयानात्रसंशयः अज्ञानरागद्वेषाद्यैःपुंसांममानचेतसां शुद्ध्यापिविनाधर्मोगंगायां
नात्रसंशयः मात्स्ये तीर्थयात्रादिकंशक्त्नमकुर्वाणोपिमानवः गंगातोयस्यमहात्म्यात्सोप्यत्रफलभाग्भवेत् स्मृत्यावपि नमंत्रोनवि
धिश्चैवनमृदोनैवगोमयंनकालनियमःकश्चिद्गंगांप्राप्यसरिद्वरां सर्वएवशुद्धःकालःसर्वोदेशस्तथाशुद्धः सर्वोजनस्तथापात्रंस्नाना
दौजाह्नवीजलेइत्यादिभिमहाजनपरिगतानिवचनानिवचांसिसंतितद्विरोधात्कथंभावादिशुद्धिनियमः अतएवगणेश्वरमिश्रैः यस्यह
स्तौचपादौचमनश्चैवसुसंयतमित्यादितीर्थसामान्यादिएतद्वचनवलाद्दौचादावपिगंगायाफलंभवतीतिचेतैरेवलिखितं प्राका
रकंगंगातरविषयकमितिस्वनिवंधेव्याख्यातं अनुमतंचैतद्विद्यापत्युपाध्यायैरितिचेत् तन्न गंगादितीर्थेषुवसंतिमत्स्याइत्यादिनागंगा ४
यामपिभावशुद्धिप्रतिपादनेनगंगेतरविषयत्वस्यवक्तुमयोग्यत्वात् नचगंगादितीर्थेत्यत्रजहत्स्वार्थलक्षणा सर्वेणगांगेनजलेन
सम्यगित्यत्रतदर्शनवात् गंगायामपिशिष्टानांभावशुद्ध्यादीनामत्रविधिमृत्गोमयादीनांसुतरांप्रतिग्रहात् किंतर्हि क्रोधलोभैककर्तॄणी

नामत्यादिवचनानांतात्पर्यमितिचेत् इत्थंमदांतःसंज्ञाद्यशक्याधिकारपरत्वंममीषांवचनानांनचमत्स्यपक्षिगणादीनामपितर्हिफ
लानावदर्शनंविरुद्धमितिवाच्यंघोक्तफलाऽभावमात्रेणतात्पर्यात् किंचित्फलंतुतेषांभवत्येवेति अतएवत्वत्तीरेतरुकोटरांतरंग
तोगंगेविहंगोवर त्वत्तीरेनरकांतिकारणवरंमत्स्योत्थवाकच्छपः इत्याशयोपपद्यते अतएवपठतिनर्मदातीरसंजाताः शलनार्जुन
पादपाःनर्मदातोयसंस्पर्शात्तेपियांतिपरांगतिमिति तत्वज्ञानंलब्धवंतोगंगांप्राप्ताभुवियेनराः ब्रह्मणःसदनंप्राप्तामुक्तिस्तेषांक
रस्थिता महाभारते ऋषीणांपरमंगुह्यमिदंभरतसत्तमतीर्थाभिगमनंपुण्यंयज्ञादपिविशिष्यते वायुपुराणे तीर्थान्यनुसरन्धीर
श्रद्दधानःसमाहितःकृतपापोविशुध्येतकिंपुनःशुद्धकर्मकृत् महाभारते अग्निष्टोमादिभिर्यज्ञैरिष्ट्वाविपुलदक्षिणैःनतत्फल
मवाप्नोतितीर्थाभिगमनेनयत् वायुपुराणे तिर्यग्योनिंनगच्छेतकुदेशेनचजायते स्वर्गीभवतिवैविप्रोमोक्षोपायंचविंदति अथा
शक्तिःस्कांदे कृत्यकृत्योभवेन्मर्त्योगंगांप्राप्यैवकेवलंतद्भक्तस्तत्परश्चेत्स्यान्मुक्तएवनसंशयः अन्यत्रदुर्लभंपुण्यंमहापापकरा
दपिविषयेंद्रियसंरोधाद्यदप्यत्यंतदुःकरं तल्लभंतेसुखेनैवगंगांप्राप्यशरीरिणः महाभारते अनशोष्यत्रिरात्राणितीर्थान्यनभि
गम्यच अदत्वाकांचनंगाश्चदरिद्रोनामजायते • अयंचोपवासःफलविशेषार्थी नत्वावश्यकस्तीर्थमभिगम्य व्रतोपवासनि
यमयुक्तत्वात् अहमवगाहनंत्रिरात्रमुषित्वासर्वपापेभ्योविमुक्तःस्वस्तिमांश्चभवतीतिदेवलवचनादिति ब्रह्मपुराणे ब्राह्मै
र्यज्ञैर्जपैर्होमैर्व्रतनियमैर्दानैर्नोपिवायस्तत्फलमवाप्नोतिगंगांप्राप्यतथाश्नुयात् तंत्रेणतन्निमित्तकंपिंडदानमात्रमपिकर्तव्यं
तत्रपिंडनिर्माणादिपिंडपूजांतमितिवर्द्धमानोपाध्यायाः एकस्यहृतिनानातीर्थप्राप्तोस्नानंतीर्थश्राद्धंचावर्तनीयंनिमित्त

२ संन्यासतोदिवा

५ नेदं वदेशान्नेदे पिशुद्धकथनात्तु महाभारते अनपोष्य त्रिरात्राणि तीर्थान्यनभिगम्य चेत्यादि मत्स्यब्रह्मांडयोः पापिनां
पापहं त्रिलं स्वर्गमोक्षाख्य हेतत्ताएष भुनावो गंगायाः शैत्यं शीतरुचो यथा भविष्ये ~~ऋषयऊचुः ब्रह्मविष्णुमहेशानां~~॥
पापखंडनशीलाद्धि गंगानामस्वभावतः पूतत्वमेव प्राप्नोति नरो नह्यत्र संशयः सर्वदेवमयी गंगा सर्वधर्मस्वरूपिणी स
र्वदेवमयी चैव परब्रह्मस्वरूपिणी॰ गीतायां स्रोतसामस्मि जाह्नवी भविष्ये ऋषयऊचुः ब्रह्मविष्णुमहेसानां स्कंदेंद्रम
रुतां बसतथा भास्करस्य कुबेरस्य वरुणस्यानलस्य च सोमस्य सर्वदेवानां गंधर्वाप्सरसां तथाः विद्याधराणां नागानां दे
वर्षीणां तथैव च लोकान्नेवाश्नुते मर्त्यः पुण्यापायेन वै तथा॰ मोहस्तो नौ स्थितौ लोके संसारभ्यभयंकरः छिंधं वा कथमा
प्नोति तथा मोक्षं ~~कथं~~ तथा॰ विधायच्च नरो नु विभूतां भवंतौ सर्वज्ञावस्माकं शरणार्थिनां नरनारायणावूचतुः साधुसाधुम
हाभागाः ऋषयः संशितव्रताः भवद्भिः प्रश्नमाखिलं सर्वार्थसहिताहितः परं गुह्यतरं वाच्यं शरणं तमुनिपुंगवाः ब्रह्मादिलो
कपालानां मुक्तेभ्य प्राप्तये नृणां॰ गंगैव परमा हेतुः कलिकाले विशेषतः इदं संक्षेपतः प्रोक्तं पुनः शृण्वंतु विस्तरात्॰ इदानीं नो
कृपाकाले गंगामाहात्म्यमत्र तु व्यासशिष्यो महाबुद्धिर्वेदसास्त्रार्थपारगः वेदव्यासनियोगाच्च सुमंतुर्भवतामथ एषोस्मत्स
न्निधौ सर्वं यथावत्कथयिष्यति॰ परं भूत्वैव गंगाया माहात्म्यं तु महेश्वरात् सर्वतीर्थानि क्षेत्राणि संत्यज्यावां स्थितादिह
सुमंतुरुवाच शृण्वंतु मुनयः सर्वे भूत्वा यूयं समाहिताः समस्तेषु च लोकेषु वैष्णवं प्रथितं यशः तस्या माहात्म्यमतुलं वक्तुं नै ५
वेह शक्यते तथापि वक्ष्ये संक्षेपात् देवेन कथितं च यत्॰ ममैव परमा भूतिस्तोयरूपा शिवात्मिका ब्रह्मांडानामशेषाणां माया

रप्रकृतिः परा॰ शुद्धविद्यास्वरूपा च त्रिशक्तिः कारणात्मिका आनंदामृतरूपा शुद्धा धर्मस्वरूपिणी॰ तामेव जगतां धात्रीं धार
यामि स्वलीलया शक्तिं ह्यनन्यां गायत्रीं परंब्रह्मस्वरूपिणीं॰ विश्वस्य रक्षणार्थाय देवकार्यार्थमेव च त्रैलोक्यपावनीं गंगां
सागराणां सुखाय च॰ त्रैलोक्ये यानि तीर्थानि पुण्यान्यायतनानि च पर्वतानि च पुण्यानि क्षेत्राणि यानि च॰ धर्मश्च सर्वे देवाश्च स
र्वयज्ञतपांसि च अहं ब्रह्मा च विष्णुश्च सर्वसक्तिसमन्वितः अष्टाविंशतिकोट्यश्च देवतानां तु वै सदा गंगायां सर्व एवैते सूक्ष्म
रूपेण संस्थिताः ध्यानं कृते मोक्षदं तु त्रेतायां तच्च वै तपः द्वापरे तु द्वयं यज्ञः कलौ गंगैव केवलं॰ चिंतामणिगणाश्चापि गं
गायास्तोयबिंदवः विशिष्टाः यतः प्रयच्छंति नक्तेभ्यो ह्यधिकं फलं॰ स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः चीर्णः सर्वव्रत
श्चापि गंगायां यस्तु निषेवते कृतानि सम्यक् तेनैव तपांसि नियमानि च सर्वदा न नियोगश्च यस्तु गंगां निषेवते॰ सर्ववर्णाश्रमे
ष्वो वेदविद्यस्तथैव च सास्त्रार्थपारगेभ्यश्च गंगास्नायी विशिष्यते कृते तु सर्वतीर्थानि त्रेतायां पुष्करं परं द्वापरे तु कुरुक्षेत्रं क
लौ गंगा विशिष्यते कृच्छ्रातिकृच्छ्राणि तथा कृतानि तत्फलमश्नुते सदा चांद्रायणं चैव तत्क्षणे जाह्नवी जले संसारार्णवमग्ना
ना मृतानां शरणार्थिनां नान्यः सरणदः कश्चिदुपायो दृश्यते क्वचित् विना गंगां धर्ममयीं सरण्यां सर्वदेहिन्यां गंगा पातकसं
हर्त्री सर्वसत्वार्थसाधकै श्चाहि सर्वसत्वानामिहामुत्र सुखप्रदा सर्ववेदमयी चैव परब्रह्मस्वरूपिणी॰ स्नानं नूतनमाला
हिनक्तिग्राहा महेश्वरी नावानरूपफलेदा गंगा सर्वजगद्धिता॰ सर्वज्ञानमयी देवी सर्वसंसारतारिणी सर्वोपकारिणी नित्यं स
वेतः पुण्यदायिनी॰ ज्ञानमध्ययनं होमो दानं ध्यानं तपो मखः सर्वमेतिल्लत्स्थितं नत्वा गंगायां नात्र संशयः अहोमहा

गं०म० ६
तं०

प्रभावोयंगंगायांभूयतेसदासिद्धयः सिद्धिलिंगानिरसलिंगानिवेरसाः स्पर्शलिंगादिव्यानितथादिव्यौषधीनिच महा
रत्नमयानिवरदानिनिवहून्यपि दिव्यरत्नान्यनेकानिचिंतामणिगणस्तथा गंगाजलांतस्तिष्ठंतिनिगूढानिसहस्रश
अतएवसुसंसेव्याकुलेगंगैवकेवलं अन्यत्रतपसाजप्यैर्दानैर्नानारतैर्नच। यदवाप्यंकलौपुण्यंतत्सुखेनैवलभ्यते अन्य
त्रकुर्वन्नपुण्यंमहापापकरादपि विषयेंद्रियसंयोगाद्यद्यप्यत्यंतदुःकरात् तल्लभंतिसुखेनैवगंगांप्राप्यशरीरिणः। सुस्वा
दशीतलजलांसुनिर्मलमनोरमांसुखस्रवांनदींपुण्यांनयनानंदिनींतथा। सुषड्वादेवतांतुदृष्ट्वादृष्टफलप्रदांदर्शनस्प
र्शनपानाद्यैर्नामासैर्नचेत्सदा विषयेंद्रियसंयोगादपिदानात्रसंशयः सूर्योदयेतमोयद्वद्विंद्रंदृष्ट्वायथानगाः यथामेघाम
हावातैस्तार्क्ष्यंदृष्ट्वायथोरगाः तत्वज्ञानैर्यथामोहःध्वांतंसिंहंदृष्ट्वायथामृगाः तथापापानिसर्वाणिगंगांदृष्ट्वाप्रयांतिलं· तथा
गंगायांकणदिग्धस्यवायोः संस्पर्शनादपि पापशीलाअपिनराः श्रुनागतिमावाप्नुयुः संसारमोक्षकोदेवोजनानाम
नुकंपयागंगातरंगरूपेणसोपानंनिर्ममेनुवः अलक्षणोपसर्गोश्चनराणांमूर्ध्निसंस्थितानुगंगायाः शक्तिरेवात्रता
न्विनाशयितुंध्रुवं। गंगांप्राप्यकृतार्थंस्मीत्यात्मानमुपलक्षयेत् सप्तसागरमुख्यानिसर्वतीर्थानिसर्वदा ~ अतीत्यस्वप्र
भावेनगंगानाम्नाभागीरथीस्मृता स्वकिमनतिक्रम्यतपोयोगक्षमादिभिः सर्पितानींद्रियाण्यत्रसमाहृत्यस्वशक्तितः गंगांसे
वेच्चनियतः सर्वसुद्धिंचगच्छति। इंद्रियाख्यमहाचौरैर्हृताचित्तमहाधनाः विषयाख्यमहाचौरैर्दृश्यमानापिनित्यशः योनरः
पुत्रमृत्यादिनात्यक्तः कः कुमार्गगः इतस्ततः धावमानः शर्करेक्षुशसंहतः तस्यनान्यद्धृद्भातांगंगैवात्राणदात्रीति ॥ : :

६

पापपांसुमहावात्यापापमूलकुठारिका। पापेंधनदवज्वालागंगेयंपुण्यवादिनी पितरोयोगिनश्चैवगाथांगायंतिसादराः॥
अपिनःसकुलेकश्चित्गंगास्नायीभविष्यति।देवेभ्यश्चपितृभ्यश्चदास्यतेसतिलंजलं॥ अपिनःसकुलेभूयाच्छिवविष्णोश्चभ
क्तिमान् तदालयेकरोत्येकस्तत्रसंमार्जनादिकृत् तथा परभूमिप्रयहर्त्तारः परद्रव्यापहारकाः परस्त्रीषुरताश्चैवदेवब्रह्म
स्वहारिणः महापातकिनोयच्चसर्वपापेभ्यसीलिनः अष्टविंशतिकोटीषुनरकाणांक्रमेणतु"दारुणास्वतितीव्रासुमंत्रया
ग्पाशिताग्निषुयेकल्पांतेसमुत्तीर्णाष्टहाकीटादियोनिषुः तावत्कालंतुसंसारेभ्रमितंयोगपतांगताः तेपिवार्द्धकमासाद्यचिमु
क्तःशप्यजाह्नवीपश्चात्सयतचित्तास्तुप्रपद्यंतेशुभांगतिंगंगायास्त्विदंमहात्म्यात्प्रपद्यंतेनसंशयः तथा यतोविष्णुरक्त
तोगंगायतोगंगाततोतपः यतोधर्मस्ततोज्ञानंयतोज्ञानंततःसुखं। यत्रगंगाहरिस्तत्रयत्रविष्णुस्तत्रश्रीस्ततोजयः कीर्तिल
क्ष्मीर्धृतिःसत्यंमेधाविद्याबलंचधीः यत्रलोकानदृश्यंतेभूतानिविषयास्तथा इंद्रियाणिचसर्वाणिब्रह्माद्यादेवताग
णाः"यतोवाचोनिवर्त्तंतेअप्राप्यमनसासह चिदानंदमयंयत्तुनिर्विकल्पंनिरंजनं। सदादिरहितंयथाअणोरणुतरंय
च्चमहतोपिमहत्तरंसूक्ष्मं"सर्वविदत्याससमप्रमेयमनोपमम् सर्वसारंचयन्नित्यंसन्मात्रंसर्वसंस्थितं। ब्रह्मणोप्यपरि
च्छेद्यमुपरिष्टात्परंपदं तदेवेदंशिवागंगासाक्षान्नारायणीपरेः तस्यास्तुदर्शनादेवविष्णुमायाविनश्यति॥ मत्स्यपु
राणे॥ तीर्थानांपरमंतीर्थंनदीनांपरमानदी मोक्षदासर्वभूतानांमहापातकिनामपि तथा पवित्राणांपवित्रंतुमं
गलानांचमंगलं विश्वेश्वराशिरोजूतासर्वपापहरासरित् देवानांतुमहादेवो यथाश्रेष्ठतमः स्मृतः सर्वेषामेवतीर्थी

नांगंगातीर्थं विशिष्यते॥ महाभारते मेरोः समुद्रस्य च सर्वरत्नैः संख्योपलानामुदकस्य वापि शक्यो वक्तुं नेह गंगाजला
नां पुण्यसंख्यातुं संदिमात्तुं तथैव॥ सर्वतीर्थमयी गंगा सर्वधर्ममयो मनुः॥ सर्वशास्त्रमयी गीता सर्वदेवमयो हरिः॥ नास्ति
७ गंगासमं तीर्थं न देवः केशवात्परं ब्राह्मणेभ्यः परं नास्ति एवमाह पितामहः॥ विष्णोर्मानुष्यशरीरे यो विपुष्पाद्भवपादपाः
तद्वद्देशा दिशश्चैव हीना गंगाजलैः शुभैः॥ तिस्रः कोटिर्द्धिकोटीश्च तीर्थानां वायुरब्रवीत् सर्वं कलिकाले तु गंगायां नात्र सं हा
शयः॥ नृतेश्वरादिह परो न हि पूज्ना नायोनैवाश्वमेधसदृशः क्रतुरस्ति तात गंगासमं त्रिभुवने न हि तीर्थमस्ति नान्यद्व्रतं
च शिवरात्रिसमं तथास्ति॥ सर्वपापहरा श्चैव मघः शुद्धिकरा परा महापुण्यप्रदा सद्यः स्वर्गमोक्षप्रदे वसाः॥ द्विः सप्तभुव
नाद्य तु हृद्विश्वापि प्रयत्नतः सारमूर्तिर्धर्मस्य ज्ञानेश्वरमहेश्वरैः॥ पद्मे सर्वसारमयी या च स्वकीयानंदरूपिणी प्रीत्यै
यो वलीलया धत्ते स्वमूर्तिं परमेश्वरः॥ योसौ सर्वगतो विष्णुश्चितस्वरूपी जनार्दनः॥ स एव द्रवरूपेण गंगांभो नात्र संशयः॥
ब्रह्मांडे कलौ तु सर्वतीर्थानि स्वं स्वं वीर्यं स्थिनावतः गंगायां प्रतिमं च्यंति सा तु देवी न कुत्रचित्॥ वामपादांबुजांगुष्ठन
खस्रोतो विनिर्मितौ विष्णोर्बिभर्ति यां शिरसा विभर्त्यहर्निशं हरः॥ ततः सप्तर्षयो यस्याः प्राणायामपरायणाः॥ तिष्ठंति वीचि ७
मालाभ्यरुह्यमानजटाजले॥ वातैर्द्धैः मामृतं यस्याः प्लावितं शशिमंडलं भूयोधिकत्तरां कांतिं धत्तो गगनमंडले॥ मेरु
पृष्ठे पतत्युच्चैर्निष्क्रांता शशिमंडलात् जगतः पावनार्थाय या प्रयाति चतुर्दिशं॥ सिता चालकनंदा च चक्षुर्भद्रा च वैक्रू

तकैवमावचतुर्नेदिदिग्गनेदगतिलक्षणा नेवेचालक नेदास्वयंयस्याःसर्वोपकारके दधातिशिरसाप्रीत्या वर्षाणि
मयुतशतं शंभोर्यदाकल्पापात्तुवित्तिःक्रान्तास्त्रिशार्करः श्लावद्यल्वादिर्गंनिन्येयापापानसगरात्मजान्• यस्यामि
ष्ठामहायज्ञेयज्ञेशंसकाचकं दधाति सिरशा प्रीत्या वर्षाणामयुतंशतं। पुरुषोत्तम द्विजाःपूज्यापरोमृद्धिमवा
पूर्दिविचेहच• स्नानादिधृतपापास्त्वयज्ञेतेयतयस्थिताः केशवाशक्तिमनसःआशानिर्वाणमुत्तेमं• तथा नग
वद्भिस्पदांगुष्ठाद्विनःसृतजलस्पेतस्यमाहूतम्पंयन्नकेवलमुनिसंध्यादिपूर्वकस्नानाद्युपयोगेउपकारिकम
ननिसहितमेतत् प्राणिनास्थिचर्मस्नायकेसाघुष्टशरीतातमपितदुपरिपततिसद्यः शरीरिणांस्वर्गान
यति महाभारते तस्थस्तत्रततःसर्ववर्णेष्वमयुतानराःमहापातकयुक्तःपुनःसद्योमुच्यतवंधनात् तथा
॥ सन्निकर्षात्रमत्योनांगंगानादरकारणं गंगाहित्वाप्रदन्पांमस्तत्रत्यायांतिमुक्तयेः ब्रह्मपुराणे दर्शनो
ब्राह्मणोयद्वत्ततथातीर्थेषुजाह्नवी स्वर्गस्थैर्गगनस्थैश्चतथापातालवासिभिः अवगाह्यासदागंगायू
ज्यवेघातसवेदा सर्वेषामेवभूतानांपापोपहतचेतसां ः गतिमन्वेषमानानांनास्तिगंगासमागतिः॥ष्
महाभारते नेदेशास्तेजनपदास्तेशैलास्तेपिचाश्रमाःयेषांनागरिथीपुण्यामध्येयातिसरिद्वरा• तपसाब्र
ह्मचर्येणयज्ञैःस्नानेनवापुनः गतिंनलभतेजंतुर्गंगांप्राप्ययदाप्नुयात्• पूर्वेवयसिसर्वाणिकृतापापानिसर्व
सःपश्चाद्गंगानिषेवितेतेपियान्तुत्तमांगतिं पुलस्त्यः कपटेनापिगंगायांस्नानदानादिकर्मकृत् योलान

स्यालिपूजार्थं कुर्यात्तमोपि दिवंकजेत् लिंगे ब्रह्महा गुरुगोघ्नश्च स्तेयी च गुरुतल्पगः गंगां न सा तु पूर्वैरकात्र
कार्या विचारणा यम दोच्चस्य मुहूर्तं वापि शीतमुष्णमथापि वा गांगेयं हरते तोयं पापमामरणान्तकं • वर्ज्यं प
र्युषितं तोयं वर्ज्यं पर्युषितं दलं न वर्ज्यं जाह्नवीतोयं न वर्ज्यं तुलसीदलं तथा गंगातोयाभिषिक्तां तु निशामस्नाति
८ योगवित् सर्पवत्कंचुकं त्यक्त्वा पापानीह नरोत्तमः स्वर्गापवर्गकां सिद्धिं प्राप्नोत्येव न संशयः गंगया जलदिग्धो यः
पवनः पुरुषं प्रति स्पृशते सोपि पापानां सर्वमेव व्यपोहति नारदीये हिमवद्विंध्यसदृशा नाशयः पापकर्मणां गं
गां न सा तेन नश्यंति विसुनक्ति हृतापथा न विघ्ने गुणवत्यात्र पूजायां नस्याद्वैतादृशं फलं यथा गंगाजलस्नानपू
र्णेनैव विधिना कृते • जलकृत्यानि सर्वाणि गंगातोयेन यः सदा नियमेनैव कुरुते यावज्जीवं प्रतिज्ञया • स एव जीव
न्मुक्तः स्यात्स मुनिः स च पंडितः तैरेव साक्षात्संप्राप्तं मोक्षाख्यं परमं पदं ॥ गंगाजलात्स्वरूपेण तत्त्वज्ञानं व्यवस्थि
तं तस्मात्तज्जलमेवात्र मोक्षमार्गप्रदर्शकः पुलस्त्य वापीकूपतडागेषु देवखातनदीषु च उपर्युपतितः श्रे
ष्ठं जलं गांगं विशिष्यते • ब्रह्मांडे सर्वाणि यस्यां गांगेयैस्तोयैः कृत्यानि दिने दिनो देहत्यक्त्वा नराः सर्वे पदे तिष्ठंति ८
सर्वदा • महाभारते देवाः सोमार्कसंज्ञानि यथा सत्रादिनिर्मखे अमृतेनोपजीवंति तथा गंगाजलं नराः

॥ब्रह्मांडे प्रभासेगोसहस्रेण राहुग्रस्तेनिसाकरे जत्फलंपांडवश्रेष्टगंगायांतद्दिनेदिने दानधर्मं स्वायंभूवं
यथास्थानंसर्वेषामुपरिस्थितं तीर्थानांसरितांश्रेष्टांगंगानद्वदिहैष्यते॥शिवपुराणे॥ नास्तिगंगासमंतीर्थं नास्ति
वेदसमास्मृति नास्तिमृत्युसमःपंथानास्तिनृतिसमंतपः वनपर्वणि यत्रगंगामहाराजसदेसस्तुतपोवनं।
सिद्धिक्षेत्रंचतज्ज्ञेयंगंगातीरसमाश्रुयं पतितस्यातोरजोयोगोरथ्याजलनिषेवणं गंगाप्राप्यनदुःष्येत साहिधर्मद्र
वीयतः दिनत्रियंगंगापामपिरजोदूषणमितिकश्चित्कः सामाचारःप्रमाणंतुतत्रनास्तीति अथदर्शनप्रकर्णं
महाभारते जातांधैरेवतुल्यास्तेमूकैःपंगुभिरेववा समर्थायेनपश्यंति गंगांपुण्यजलांशुभां॰ लावण्यैर्नेष्टविष
येनसूनेनधनागमैः यथाप्रसादोभवतिगंगांवीक्ष्ययथाभवेत् गंगानारदसंवादे मंज्जतिमुनयःसर्वेत्वमकः।
किंनमंज्जसे मुक्तिस्त्वद्दर्शनाद्देविनज्ञानेस्नानजंफलं ब्रह्मांडे ज्ञानमैश्वर्यमायुश्चप्रतिष्ठासर्वमान्यता शुभा
म्नै नामाश्रयत्वंचगंगादर्शनजंफलं॰ सर्वेंद्रियाणांचापल्यंव्यसनासक्तिवार्णवैः निर्विण्णत्वंनृणांगंगादर्शनाद्दे
वनश्यति॰ परहिंसाचकौटिल्यंपरदोषाद्यवेक्षणं दांभिकानांनृणांगंगादर्शनाद्देवनश्यपति पद्मपुराणे मकृर्मकृ
त्स्यापश्यत्स्पर्शेद्देवमुहुर्मुहुः भक्त्यायदीक्षतिनरःशश्वतंचान्टतंयदिपरापवादशीलत्वंपरद्रव्याभिकांक्षितं
परधर्मरतिर्गंगादर्शनदेवनश्यति स्मृतिश्च वर्त्तमानमतीतंचज्ञानतोऽज्ञानतोपिवा कृतंयदशुभंकर्म

गंगां दृष्ट्वा प्रपश्यति तथा वापीकूपतडागादिष्व यासन्नादिनिस्तथा अन्यत्र यद्भवेत्पुण्यं तद्गंगादर्शनाद्भवेत् वा
प्यादिलक्षणं तु वसिष्ठसंहितायां शतैर्द्धनुर्भिः पुष्करिणी त्रिभिः शतैश्च दीर्घिका चतुर्भिर्दीर्घिकाः पंचभिस्तु तडागः
द्रोणादर्शनेनास्तिव्याक्तः गुणावापीतिकेचेत् ख्यातिर्नानात्मपूजादौ यथा यत्नः सदा तथा गंगायां दर्शनेत
स्यात्सवैस्वर्गस्य भाजनं यत्फलं जायते पुंसां दर्शने परमात्मनः तद्भवेद्देवगंगाया दर्शनेनात्र संशयः श्रुतानां
१८ मासपदं स्यात्सपाक्स गंगां दृष्ट्वा तु नान्तितः नैमिषे च कुरुक्षेत्रे नर्मदायां च पुष्करे स्नानात्संसेवनाद्वापि यत्फलं तु
गं०म० लभेन्नरः गंगायां दर्शनादेव कलौ प्राहुर्महर्षयः तावद्भ्रमति संसारे यावद्गंगां न पश्यति अज्ञानपटलछन्ने च
क्षे प्राज्ञमानिनः अन्ये तु नास्तिका दुष्टाः पश्यन्तु नष्टचेतसः गांगं सुपुण्यदं वारि सा धारणं जलं यथा विधू[illegible]
तपापास्ते मत्स्या परब्रह्मस्वरूपिणीं सहस्रसूर्यप्र×××तिमां गंगां पश्यंति भूतले। वेदांतवेद्यं यत्त[illegible]लं पर
ब्रह्मस्वरूपिणी पश्यंश्च तदिमां गंगामप्रत्यक्षं पुरतः स्थितां अशोकतां की त्रिमत्स्वं धर्मनिष्ठा दयान्विता धनधा
न्यसमृद्धिश्च गंगादर्शनजं फलं न विद्यते भवंति निर्विषाः सर्पा यथा तार्क्ष्यस्य दर्शनात् गंगायां दर्शनान्मर्त्यः
स्तद्वत्पापात्प्रमुच्यते दानधर्मे सप्तावरान्सप्तपरान् पितॄन् तेभ्यश्च ये परे पुंसां तारयते गंगा वीक्ष्य स्पृष्ट्वा
दगाहस्व। मनोवाक्कायजैः पापैर्नरो दक्षु विधैरपि वीक्ष्यमाणे च गंगायां पूतो भवति तत्क्षणात् अथ स्पर्शने

॥विष्णुपुराणे॥ शुष्कपर्णानि दावेन यथा नश्यंति तत्क्षणात् दोषाः प्रणश्यंति गंगायाः स्पर्शनेन च॥ अश्वत्थ-
निंबनूतादिवृक्षारोपैश्च यत्फलं वटपुष्पादिनिश्चापि स्पर्शनात्स्यात्ततोधिकं॥ अपहृत्य तमस्तीव्रं यथा भा-
त्युदितो रविः॥ तथापहृत्य पापानि भाति गंगाजलोक्षितो॥ ब्रह्मांडे अनन्यापि महापापो गंगास्पृष्टाम्बु-
भिर्भवेत् अनिच्छयापि संस्पृष्टो दहत्येव हि पावकः जीवितं नरकार्थीन्द्रियस्य मूर्खस्य पापिनः तस्यापि स्व-
र्गहेतुः स्याद्गंगास्पर्शो यद्दर्शनं गंगांस्य न विधूतपापः स्वर्गं प्रयाति हि अथोर्ध्वं कफेलावाप्तिस्तस्य विज्ञाचु-
मीयते नारदीये यद्यपि गंगां स्पृष्ट्वा यद्ब्रह्मरूपां सुपुण्यदां शुद्धा भवंति ते सर्वे सर्वदैव न संशयः यथोक्तं
श्वा यस्मात् लोके मलीमसनरोपि च गंगासंस्पर्शनात् सद्यो हेमत्वं प्रतिपद्यते॥ यद्यकार्यशतं कृत्वा कृतं गंगा-
भिषेचनं सर्वं दहति गंगांभस्तूलराशिमिवानलः शुलाभिलषिता दृष्टा स्पृष्टा पीता वगाहिता गंगा तारयते पुं-
सां वंशो नावार्णवात्॥ दर्शनात्स्पर्शनात्पानात्तथा गंगेति कीर्तनात् पुनाति पुण्यान् पुरुषान् मातेव ज-
गतो हिता अथ प्रवेशोद्यमाणां प्रवेशमात्रे गंगायां स्नानार्थं भक्तितो [illegible] नृणां ब्रह्महत्यादिका दोषा हाहेत्यु-
क्ता प्रजांत्यलं॥ अथ स्नानं॥ विष्णुपुराणे॥ स्नातस्तु सलिले यस्यां सद्यः पापं प्रणश्यति अपूर्वपुण्यप्राप्तिश्च
सद्यो मैत्रेय जायते ब्रह्मांडे॥ एकेन स्नानमात्रेण विधिना भक्तिमान्नरः अश्वमेधफलं सद्यो गंगायां मा

मृयाध्रुवं अनेकजन्मसंभूतं पुंसां पापं प्रणश्यति स्नानमात्रेण गंगायां सद्यः स्यात्स्वर्गभाजनं॰ अन्यस्थानकृतं
पापं गंगातीरे विनश्यति गंगातीरे कृतं पापं गंगास्नानाद्विनश्यति महाभारते अल्पस्यापि कलिसंयुक्तोऽत्र
हत्वा शचीपति आप्लुतः सर्वपापेभ्यो गंगायां स प्रमुच्यते न विघ्नं गंगा पश्यति संस्नातीति स्नातिमनुष्यापि वेज
१० ले सस्वर्गं ज्ञानममलं योगं क्षेमं च विंदति तथा गंगास्नानरता ये च गंगामाहात्म्यभाविताः यथा क्षिप्रं प्रमु
ग०म०१० च्यंते तथा तीर्थांतरे न हि॰ सर्वतीर्थेषु यत्पुण्यं सर्वेष्वायतनेषु च तत्फलं लभते पुण्यं गंगास्नानान्न संशय
॥ महापातकसंयुक्तो युक्तो वा सर्वपातकैः गंगास्नानेन विधिना मुच्यते सर्वपातकैः॰ गंगास्नानात्परं स्नानं भूतं
न भविष्यति विशेषतः कलियुगे पापं हंति व जाह्नवी दुःकुलीनः कुलीनो वा यो वा को वाप्यलक्षितः गंगा
स्नानेन न स्याद्वा पूज्यो सौ एव न जाने शक्रस्य पंडितस्यापि गुणिनो दानशीलिनः गंगास्नानविहीनस्य
तस्य जन्म निरर्थकं निहंति कलिजान्दोषान् कायवाचिकसंभवान् गंगास्नानेन न स्यात् मोदते दिवि देववत्
त् स्नात्वैव तावद्गंगायां ब्रह्महत्यादिपातकैः विमुक्त एव मिंद्रोपि गंगा को नाम न आश्रयेत॰ तथा सर्वासु वेला
सु गंगास्नानं सपुण्यप्रदं तिथिनक्षत्रयोगादि नापेक्षेत् तीर्थवासिनां॰ स्नानमात्रेण गंगायां पातकौघं प्रणश्य १०
ति अपूर्वधर्मो वाप्यशेषस्तदानीमेव जायते॰ तथा चान्यानि तीर्थानि स्नानकाले जपेत्स्मरेत्॰ गंगायां स्नान

कालेतत्गंगामेवजपेत्स्मरेत गंगास्नानरतोनित्यंमहापातकजैरपि सर्वदोषैर्नलिप्येतपद्मपत्रमिवांभ-
सा॰ गंगातुनित्यमैश्वर्यंसदासौख्यंददातिच ब्राह्मे अनेकजन्मसंभूतंपापंपुंसांप्रणश्यते स्नानमात्रेणगं
ग गायांसद्यः स्यात्पुण्यमुत्तमं भविष्ये गंगास्नानरतंमर्त्यंदृष्ट्वैवयमकिंकराः दिशोदिशंपलायंतेसिंहंदृ
ष्ट्वायथामृगाः यमोपिनीतस्तंदृष्ट्वाप्रणपत्यप्रपूज्यच नसक्नोतितथाख्यातुंतस्याग्रेपुण्यकर्मणः मेरुमंदि
रमात्रोपिराशिः पापस्यकर्मणः गंगास्नानेनदग्धंस्यात्तूलराशिमिवानलाः अप्सुनारायणंदेवंस्नानकाले
सदास्मरेत् साक्षाद्ब्रह्मस्वरूपायांगंगायांतुविशेषतः ब्रह्मघ्नोवासुरापोवागोघ्नोवापंचपातकी लेसर्वेनि
ष्कृतिंयांतिगंगास्नानान्नसंशयः ब्रह्मान्वेषाधानधर्मेषु स्नातानांशुचिनिस्तायैर्गांगेयैश्चयतात्मनां व्युष्टि
र्भवतियापुंसांनसाक्रतुशतैरपि व्यष्टिविशेषेच्छापूर्त्तिनिस्वर्गमवाप्नोति पीत्वाज्ञानमवाप्नुयात्तु गंगास्नानेन
तुनत्यासमाप्नोतिमहाजनैः शिष्टा गंगायांमौशलेस्नानमहापातकनाशनं भविष्ये कपिलाकोटिदान
द्धि गंगास्नानंविशिष्यते सकृद्गंगावगाहेनकुलकोटीः समुद्धरेत्॰ कुशाग्रलिंङ्कृतिंकृत्वातीर्थवारिणिमज्जये
त मंत्रजयेद्यमुद्दिश्यअष्टनागंलभेचस॰ कुशोसिब्रह्मपुत्रोसिब्रह्मणानिर्मितः पुरात्वयिस्नातेसचर्स्मीतेः
यास्यहरामजूटिका अष्टनागंयमुद्दिश्यतिशोषः अष्टवारमेतत्कार्णान्मज्जनंभवतीति॥ अथपुन्यकालवि

शेषफलविशेषाः तत्रादौ स्नानप्रसक्तेः पुण्यफलविधेस्तत्रप्रतिमास्थानिनिमित्तानि, ब्रह्माण्डे रात्रौ दिवाच
संध्यायां गंगायां तु प्रसंगतः स्नात्वाश्वमेधयपुण्यं गृहेषु धृततज्जलैः एवंच स्नाननिषेधो न गंगायां न च काल
नियमः रात्रेत्यभिधानात् एवं स्नानं तर्पणमपि कर्त्तव्यं शाधारविषयेरेवां गप्राप्तेः दिवाच मध्यान्हव्यतिरिक्ते तत्र
११ विशेषश्रुतेः संध्याचाऽत्र प्रातः सं× रात्रौ ×ध्या संध्यांतरे भविष्ये विशेषकथनात् प्रसंगतः आकस्मिकप्राप्तो
उद्धृतजलस्नानमहिम्नसनानशक्तौ अन्यथाफलसाम्ये प्रातः स्नानेऽप्रवृत्त्यापत्तेः नच फलभौमाकल्यते क
ल्पनागौरवात् वाक्यभेदापत्ते भविष्ये प्रातः स्नानतु गुणं मध्या× गृहेन्हेममुदाहृतं सोयंकाल्ने दशगुणं मनं
तं शिवसंनिधौ॰ एवंच स्नानसामान्यविहितफलानि प्रातमध्यान्हसायंसमयव्यतिरिक्तसमयेतेषु विशि
ष्टैव फलसृक्कश्रुतेः भविष्ये उभयोः पक्षयोर्जातास्त्रिस्त्रस्तातिथयः शुभाएकादसीतथाषष्टीप्रतिपच्चनि
वोधता नंदा तु कथितास्माभिः सर्वपापहराशुभा सप्तजन्मसु यज्जुक्तं पतितान्नं चैतैः सहः संसर्गतः कृतं प
चपातकानि महांतिचः तथाव वचनानि पापानि क्षयतामियुः रजस्वलायास्पृष्टान्नं भोजनं चापियज्भवेत्
सततात्सत्य नाषेणस्वर्णापहरणेन च मणेश्चापि चरत्नास्य सामान्य सकलस्य वा वस्तुनश्चापहारेण वधः ११
सखु द्विजातयः मित्रहिंसाविप्रहिंसामातृहिंसादिभिश्च यत् यानि चैव महांतानेरौरवादीनियानि चः ॥

तेषु नैरंतरं विप्रास्ताउ यंतिहि वारयेत् यमस्य किंकराणां वै पापमाजन्म यत्कृतं॰ बालयौवनवार्द्धक्यदश
पापक्षयो न वेत् ब्रह्मलोकाधिकरणो दृष्ट्वा हिंसापरं द्विजं धेनूनां कपिलानां तुलक्षं दत्वा द्विजन्मने चतुर्वेदा
द्यधीता यतत्फलं लभते नरः श्रीमान्नारायणस्येह दक्षिणे वसेत भुंजे मर्त्यलोके ततो जन्म ततो वक्ष्यगुणान्वि
तः भुंक्ते सर्वसुखं भोगं यशश्चाप्नोति मानवः गंगास्नाने नंदायां नात्र कार्या विचारणा॰ द्विजातय इति संबो
धनं विप्रा इति संबोधनं विप्रकर्षात् एवच्च नंदावाक्यं सोढदेवशर्मवर्द्धमानप्रभृतिभिः प्राचीननिबंधकर्तृ
भिर्नोपात्तमिति मैथिलानाममूलत्वशंका गंगापत्तलके भ्रग्रंथे विधापत्युपाध्यायैस्तु भविष्ये इत्युपक्रम्य
लिखितमस्तीति क्वचित्कालस्य समादरः भविष्ये कृष्णाष्टम्यां सहस्रं तु शतं स्यात्सर्वपर्वसु अमावस्यां
सहस्रं तु सहस्रं तु दिनक्षये॰ अष्टमी चेयं माघस्य तत्संदेशादिति तथा माघी त्वमावास्या गंगायां तु सुदुर्ल
भेत्युपक्रम्य पाठात् तत्रापि माघशुक्लपूर्वपक्षस्य कृष्णादेस्तत्र शिष्टपरिग्रहात् सर्वपर्वस्विति सर्वमास
साधारण्यं सर्वपदस्वरसात् अमावास्यां सतगुणमिति पाठ एवं च सर्वपर्वस्वित्यनेन सहगोवृषन्यायादि

त्यन्वय इति वदंति अत्रक्षसाश्म्यांर्मामध्यामेव यदि सहस्रगुणफलकत्वेन शिष्टपरिग्रहस्तर्हि माघसंदे
शोस एव प्रमाणं न चेत्तथा शिष्टपरिग्रहस्तर्हि माघानुयज्ञैः संपूर्णत्वेन भिन्नक्रिपरिणामेन च प्रमाणा
१२ भावात् सर्वदक्षस्य पक्षाश्म्यामेव ॥ यमः गोन्यः किमशनं दद्यात् दीपं दद्याच्चतुष्पथे पक्षान्ते स्नानसिस्ना
गं०भं०त० यात्रेन न नायाति मत्पुरं किमशनं किंचिद्दर्शनमित्यर्थः भविष्ये संक्रान्तौ पक्षयोरन्ते ग्रहणे चंद्रसूर्ययो
गंगास्नानेन नरः कामाद्ब्रह्मणः सदनं व्रजेत् अत्र जघ्यममावास्यायां भविष्यत्पुराणीयपूर्वलिखितवा
क्येन सततगुणफलजनकत्वमेव प्रतिपादितं तथापि ब्रह्मसदनावाप्तिस्तस्य विकल्प एवेलत्वेकमुनि
प्रणीतत्वमात्रेण समुच्चयः निरपेक्षश्रुतेः गरुडे भविष्ययो पुष्ये वा जन्मनक्षत्रे व्यतीपाते च वैधृतौ अ
मावास्यां नदीस्नानं हरत्या जन्म दुष्कृतं ॥ वितीपातो वक्ष्यते पुष्ये कुलकोटिसमुद्धारो ब्रह्मपुराणे वक्ष्य
ते न ष्टव्यप्रकरणांगेगैव भविष्ये जन्मने लक्षतं स्नानं गंगायां न लिभावतः जन्मप्रभृति यत्पापं तत्क्षण १२
देव नश्यति आत्मनो जन्मनक्षत्रे गांगतटे जाह्नवीजलेन नरः स्नात्वा दिवं याति कुलकोटिं समुद्धरेत् ॥

अत्रापिनंदनगुपठितभविष्यपुराणीयवाक्यद्वयेयथाजन्मदुष्कृतनाशशुक्लत्थापितेनसमयस्याविकल्पः निरपेक्ष
श्रुत स्कंदे अध्वरस्यवारेणवारेणांगारकस्यचकृष्णाष्टमीचतुर्दशौरीयतंफलमाप्नुयात अत्रस्नानादिसाधारण
मिदंप्रकरणात तथा सोमवारेत्वमावास्या आदित्याह्वेचसप्तमी चतुर्थीभौमवारेण अष्टमीचबृहस्पतौः अत्र
यत्कृतंतेपापंधर्मसंचयएववा षष्टिजन्मसहस्राणि प्रतिजन्मतदक्षय एतानस्कंदपुराणीयवाक्यनिप्रतिहस्त
कसोढदेववर्द्धमानप्रभृतिभिर्नलिखितानि विद्यापत्युपाध्यायैः स्कंदइत्युपक्रम्यलिखितानिनातिसमूलताशं
कानीतिः भविष्ये शुक्लपक्षस्यसप्तम्यांसूर्यवारोभवेद्यदिसप्तमीविजयानामतत्रदत्तंमहाफलं· स्नानंदानंज
पाहोमंउपवासस्तथैवच सर्वविजयसप्तम्यांमहापातकनाशनमितिशिष्टपरिगृहीतंवाक्यंमहत्रिमजल
मात्रविषयंगंगामनुक्रमपाठात् प्रचेता अमावस्यांयदावारोभवेद्भूमिसुतस्यवैगोसहस्रफलंदद्यात्स्नान
दानेनजाह्नवी तथा सिनीवालीकुहूश्चैवयदिसोमदिनेभवेत्· स्नानंजन्मोनिनाकृतंसमाप्यजलाधिकरणम
तत्गंगामनुक्रम्यपाठात् मौनंचैतद्वरुणोदयादारभ्यस्नानमात्रेतत्रमौनस्योच्चारमैथुनचैवप्रस्रावेदंतधावने
स्नानेभोजनकालेचषट्सुमौनंसमाचरेत् इतिस्कंदपुराणप्राप्तेः ब्रह्मद्वासिरः श्रवणास्विधनिष्ठार्द्रानागदेवत
मस्तकं अमावैसोमवारेणवितीपातःसउच्यते नागदेवतमश्लेषामस्तकमृगशिरः तत्रजन्मदुष्कृतविहान

विष्णेरुक्तः समुद्रगे ग्रास्ते च वक्ष्यते कल्पतरुकारस्तु ब्रह्मपुराणीयवाक्यं पठित्वा व्यतीपातः सूर्याचन्द्रमसोः क्रा
न्तिसाम्यमिति व्याख्यातवान् वाचस्पतिमिश्रा अपि तदेवमन्वंते नविष्णे चतुर्दश्यां यदा युक्तो व्यतीपातेन चंद्र
मा तदा पुण्यतमः कालो देवानामपि दुर्लभः तदा यः स्नाति गंगायां न क्ष्यात् तत्फलमाप्नुयात् तत्र तत्रादिपन्नोऽपि गं
१३ गायां मरणञ्च तत् एवं चतुर्दश्यमावास्येंदु चापि योगत्रयमिति कल्पतरुस्वरसोऽत्र प्रतिभाति तथा द्वादश्यां श्रवणे
न वर्के त्र सप्तम्यां पुष्ययोगतः आर्द्रायां चतुर्दश्यां गंगास्नानं सुदुर्लभं एवं चानंतरपठित नविष्णुपुराणीयव्यतीपात
लक्षणे नास्य विकल्पाद्व्यतीपातपदेनानार्थता एव अत एवात्र विकल्पाध्यएव वेद्यवः अव्ययानामनेकार्थ
त्वात् माघे चात्र योगे फलविशेषो वक्ष्यते स्कांदमात्स्ययो एवं च यत्र वारनक्षत्रयोगादिनिमित्तविशेषो न नि
पाते फलनेर श्रूयते तत्र सामान्यपर्वादि विहितकालमनायासं संकल्पकरणमशास्त्रार्थः विशेषश्रुति
विरोधादिति विधातव्यं पौर्णमासीषु चैतासु मासर्क्षसहितासु च एतेषां स्नानदानाद्याफलं दशगुणं नव
तु एवं तजे ह्यं विशेषविधेस्तदितरपूर्णिमासु वोद्धव्यं ऋक्षस्य सहपूर्वासु चैतासु फलमक्षयम् अक्षय्य
माकल्पस्थायि सहपूर्वत्वं च यदा पौर्णमास्यामेव मासविहितनक्षत्रचंद्रब्रहस्पतियोग तथा हि विष्णु
हस्पते सहितो यस्या दिवि चंद्रब्रहस्पतिः पूर्णमासी तु महती ज्ञेया संवत्सरे तया अत्र संवत्सरपदं वर्षे ६

नतु

मात्रपरं विशेषपरं राजमार्त्तंडानुसारात् तथाहि राजमार्त्तंडे मासि संज्ञे यदा ऋक्षे चंद्रः संपूर्णमंडलः

गुपणा याति संयोगं सा तिथिर्महती स्मृता इति प्रतिमास्यनियतानि अथ प्रतिनियतमास्यानि चैत्रशु

क्ल तृतीयायां मन्वंतरादिरिति वक्ष्यति मंदे चार्के गुरौ वापि वारेष्वेतेषु चैत्रकी तत्राश्वयुजे मासि तिथिर्म

मदज्जं पुण्यं स्नानश्चलनतेनरः दानमक्षय्यतां याति पितॄणां चातिदुर्लभा । एतच्चानिंदिताकृत्रिम

जलमात्रं गंगामनुक्रम्य पाठात् निंदितं तु याज्ञवल्क्येन । प्रभूते विद्यमाने तु उदके सुमनोहरे नाल्पोदके

नरः स्नायान्नदीं चोत्सृज्य कृत्रिमे । इति नदीपदमकृत्रिमोपलक्षणं हारीतः परकीयनिपातेषु न स्ना

यात् स्नायां द्वा पंच पिया नुद्धृत्य आपदि अकृत्रिमजलाभावेपि पिंडोद्धारश्चात्र हस्ताभ्यां वर्णनूकर्तुं शक्ति

तता वानिति हारीतः अत्र प्रतिष्ठितस्य सर्वसत्वोपयोगित्वेन त्यागात् अपरश्चत्वनिष्टत्वेर्न तत्र पिंडो

द्धारः किं चात्र प्रतिष्ठितमात्र इति हरिहरप्रभृतयः अप्रतिष्ठितपानीये अपेयं सलिलं भवेत् इत्यादि

वाक्यात् अप्रतिष्ठिते स्नानाप्रसक्तेः प्रतिष्ठितामात्रे पिंडोद्धार इति वर्द्धमानोपाध्यायाः उद्धरेदित्यनु

वृत्तौ बौधायनः निरुधासु मृत्पिंडांस्त्रीन् कूपात् त्रीन्घटान् तथा अनुत्सृष्टस्वकारितेन दोषः परीय

त्वायत्तत्वनावात् विष्णुः उद्धृताद्भूमिष्ठमुदकं पुण्यं स्थावरात्प्रस्रवत्तसमानादेयं तस्मादपि साधुपरिग्र
हीतं सर्वत एव गांगं योगियाज्ञवल्क्यः त्रिरात्रफलदा नद्योयः काश्चिदसमुद्रगाः समुद्रगास्तु पक्षस्य
मासस्तु सरितां पतिः ब्रह्मपुराणे नद्यां प्रत्येकशः स्नाने नवेद्योदानजं फलं गोप्रदानैस्तु दशभिस्तासां पु
१४ एपंतु संगमे न विष्ये शिवलिंगसमानीय यज्ञोयं पुरलस्थितं शिवगंगेति विख्यातं तत्र स्नानात्वादि व्रजेत
कात्यायनः यवद्वयं श्रवणादि सर्वा नद्यो रजस्वलाः तासु स्नानं न कुर्वीत वर्जयित्वा समुद्रगाः। यद्योमासः मास
पुरस्कारेण विधिनिषेधयोरसति बाधके मुख्यादिरेव ग्रहीत इति शीदत्तोपाध्यायाः स्नानं कुर्वीतेति विशेषतो हेमं
तु निगदेत स्नानानर्हत्वमेव न त्वाचमनाद्यनधिकार इति शिष्टाः नदीलक्षणं धनुःसहस्राण्यष्टौ गतिर्यासां न वि
द्यते न ता नदीशब्दवहा गर्तास्ते परिकीर्तिता धनुःप्रमाणं पुरुषहस्तचतुष्टयं याज्ञवल्क्यः अग्न्याद्याश्चतथैवा १४
पो नद्याः प्रथमधारिता अद्योनिताश्च याश्चापि याश्च तीर्थाद्विनिःसृता तीर्थाद्विनिःसृता गंगादिर्गंगादिप्रवाह
विछिन्नप्रवाहांतरिताः श्यामतीर्थे मन्वन्तरादित्वं चैत्र्यां लक्ष्यते स्मृति वैशाखमासि राजेंद्र शुक्लपक्षे तृतीयका॥
अक्षयासा तिथिः प्रोक्ता कृत्तिकारोहिणीयुता तस्यां दानादिकं पुण्यमक्षयं समुदाहृतं ब्रह्मपुराणे ॥ वैशाखे
३

मासियुक्तायांतृतीयायांजनार्द्दनः यवोनुत्पादयामास कृतंचोर्द्ध्वान्युगं तस्मात्सर्वप्रयत्नेन प्रयतः प्राशयेद्यवा
न्पूजयच्छंकरं देवं कैलासेतुहिमाचले बृहस्पतिशुक्लपक्षे दिवाभूमौ गंगायामुत्तरायने धन्पादेहं विमुंचति हृदया
स्यजनार्द्दनः भगीरथंचनृपतिंसागराणांमुदावहं स्नानंदानंतपः श्राद्धंजपहोमादिकंचयत् शुक्लाक्रियतेतत्र
तदानंत्यायकल्पते सिंधोस्तीरविशेषेणसर्वमक्षयमश्नुते होमोत्रवासुदेवदेवताकः उपक्रमकीर्त्तनात्तु यव
मितत् युगादित्वमस्याउक्तंवक्ष्यतेच नदिष्ये वासोषपौर्णमास्यांचमाघ्यैवैकार्त्तिकेतथा तथामाघीत्वमावास्यां
प्राशनविकारद्वारासाक्षात्प्रत्यसमर्थत्वादितिकेचित्तन्न अदृष्टार्थत्वात् सिंधोर्नद्याएवनदीसामान्यएवफलं
गंगायांतुदुर्लभं अत्रसुदुर्लभफलजनकत्वंविधि पत्युपाध्यायैर्व्याख्यातं प्रतिहस्तचरणेस्तुअंतरापरिच्छि
तं कृष्णाष्टम्यासहस्रंतुइतिफलंभवतीतिव्याख्यातं ब्रह्मपुराणे वैसाषेशुक्लसप्तम्यांजाह्नवीजह्नुरापुरा
क्रोधात्पीतापुनस्त्यक्ताकर्णरंध्रात्तुदक्षिणात् तांतत्रपूजयेद्देवींगंगांगगनमेखलां वैसाख्यामनंतफकत्वं
वैशाखप्रातःमामनंति गरुडपुराणे अथहस्तेतुनक्षत्रेदशम्यांज्येष्ठिकेसिते दशपापहरायात्तेनदानमं
कल्मषं विरुद्धाचरणांहिंसापरदारोपसेवनं पारुष्यानृतपैशुन्यमसंबद्धाभिनाषणं परद्रव्याभिधानंचमनो

सानिष्टचिंतनं गांगेय ज्येष्टेमासिक्षितिसुतदिने शुक्लपक्षे दसम्यां हस्ते शैलान्निर्गमदियं जाह्नवीमृत्यु
लोकं पापान्यस्यां हरतिहितिथौसादशत्पाकुराघ्रौ पुण्यंदद्याद्दशशतगुणं वाजिमेधायुतस्य च अदत्ताना
मुपादानं हिंसाचैवाविधानतः परदारोपसेवा च पातकं त्रिविधं स्मृतं ० पारुष्यमनृतं चैव पैशुन्यं वापिसर्व
तः असंबद्धप्रलापं च वाङ्मयं स्याच्चतुर्विधं परद्रव्येष्वभिध्यानं मनसानिष्टचिंतनं वितथाभिनिवेशश्च मान
सं त्रिविधं स्मृतं ब्राह्मे शुक्लपक्षस्य दशमी ज्येष्टेमासि द्विजोत्तमा हरते दशपापानि तस्माद्दशहरा स्मृता ०
१५ अत्र गरुडपुराणानुसारेण हस्तदशमीयोगे दशहरात्वमिति ब्रह्मपुराणीयमपि ततः परमेकमूलादपि
नानाप्रकारात् गारुडे हस्तयोगेपि दशचैव पापापाताच्चेन वगांगेयानुसारेण मंगलयोगेपि पुरस्करणीय
इतिवावाच्यं तत्रदशगुणवाजिमेधायुतयज्ञजनकतयैव विशेषश्रवणात् केचित गरुडपुराणीय सामान्य १५
गंगाधिकरणब्रह्मपुराणीयसामान्य जलाधिकारणकं गौडाः पठंति ज्येष्टस्य शुक्ला दशमी संवत्सरमुखी
मतातस्यां स्नानं च दानं च दां पुण्यफलं च महापातकनाशनः यां कांचित्सरितं प्राप्य दद्याद्दर्भतिलोदकं मु
च्यते दशभिः पापैर्महापातकसंस्थितैः सेयं दशहरा वन्हिमिलितफलकामो नाधिकारीत्युक्तामीमांसकैः राम

रनुमता नविष्ये ऐंद्रे गुरुः शशी चैव प्राजापत्ये रविस्तथा पूर्णिमा गुरुवारेण महाज्येष्ठमासस्य महाजेष्टी प्र
कीर्त्तिताः प्राजापत्यं रोहिणी गुरुश्च शशी जेष्टानक्षत्रवर्त्तित्वे पूर्णिमायाश्च गुरुयोग इत्यर्थः विना गुरुवारेण
यदाह गारुडे ऐंद्रे गुरुः शशी चैव प्राजापत्ये रवि[स्त]था पूर्णिमा जेष्टमासस्य महाजेष्टी प्रकीर्त्तिता अनुराधासु
चंद्रेपि जदा हवा त्र्यमूर्त्तिः शिवलिंगं महापुण्यं सर्वपापप्रनाशनं सर्वदेवमयं चैव सर्वसिद्धिप्रदायकं ऐं
द्रे मस्ते तथा मैत्रे गुरुचंद्रो यदा स्थितौ पूर्णिमा ज्येष्ठमासस्य महाज्येष्टी प्रकीर्त्तिताः केवलं जेष्टानक्षत्रयु
क्ता ज्येष्ठपूर्णिमा तथा तद्राजमार्त्तंडे जेष्ठसंवत्सरे चैव ज्येष्ठमासि पूर्णिमा जेष्टानेन समायुक्ता वत्सरा
ऋषिभिः पुरा संवत्सरः परिवत्सरो नुवत्सर इदंवत्सर इद्वत्सरश्चेति लक्षणमेतेषां गणितशास्त्रे एवं
च समानि पूर्णिमासु दृश्यते सहिता यस्यामित्यादि लक्षणेन मासर्क्षसहितत्वे न न चान्यत्र महत्वमुक्तं त
त्र ज्येष्ठपूर्णिमायामित्युक्तं ग्राउ महाज्येष्टी सुरश्रेष्ठ कृतानंतफला स्मृता तस्यां तु जाह्नवी स्नाने महापा
तिनाशनं नविष्ये महाज्येष्ठ्यां तु यः पश्येत् पुरुषं पुरुषोत्तमं सोपि सद्गतिमाप्नोति मोक्षं गंगांबुमज्जनात्
मन्वंतरादित्वं चदृश्यते आषाढपूर्णिमायामनंतफलकत्वं मन्वंतरादित्वं च वक्ष्यते अध्ययनं दानं विष्णुपूजा
६ महाजेष्टी ततो न वेत्र संवत्सरो त्रिवर्षविशेषः ज्योतिःशास्त्रे विशेषलक्षणान्युपतः तच्च संदंसात्र
संवत्सरपद वैध्योपातोत्र तथा ज्योतिःशास्त्रं एते पंच समायुक्ता

फलत्वाप्रस्तुतत्वात् अत्रलोपदर्शितः आषाढमासस्नानेनमासत्रयफलंवक्ष्यते तत्रसौरोमासः शिष्टपरिग्र
हीतः श्रावणकृष्णाष्टम्यांमन्वंतरादित्वंवक्ष्यते भाद्रशुक्लातृतीयायांमन्वंतरादिः नविष्ये येयंभाद्रपदेमा
सिषष्ठीनवतिसत्तम इयंपुण्यापापहराशिवाशांताशुभातथा स्नानदानादिकंसर्वमस्यामक्षयमुच्यते ः
भाद्रकृसात्रयोदस्यायुगादित्वंविवक्ष्यते ः आश्विनकृसनवम्यांमन्वंतरादित्वंवक्ष्यते नविष्ये संवत्सरफलंत
१६ स्यांनवम्याकार्त्तिके तथा युगादित्वंचास्यावक्ष्यते कार्त्तिकशुक्लाद्वादश्यांमन्वंतरादित्वंवक्ष्यते कार्त्तिक्याम
नंतफलकत्वमन्वंतरादित्वंचववक्ष्यते ब्रह्मपुराणे आग्नेयंतुयदारक्षंतिथौतस्यांनराधिप सामहाकार्त्ति
कीप्रोक्तादेवानामपिदुर्लभा कार्त्तिक्यांनवति क्वचित् सातिथिर्महतीज्ञेयास्नानदानेषुचोत्तमा यदायाम्यं
तुभवतिऋक्षंतस्यांतिथौक्वचित् तिथिसापिमहापुण्यामुनिभिःपरिकीर्त्तिता प्राजापत्यंयदारक्षंतिथौत १६
स्यांनराधिप सामहाकार्त्तिकीप्रोक्तादेवानामपिदुर्लभा प्रजापत्यंरोहिणीतथा यामहाकार्त्तिकीसोस्या
जीवेंद्रौकृत्तिकास्थयोः तथाविशाखायांयदाभानुकृत्तिकासुचचंद्रमासंयोगः पद्मकोनामपुष्करेष्वतिदुर्ल
भः विष्णुः मासः कार्त्तिकोग्निदैवत्योरग्निश्चदेवानांमुखं तस्मात्कार्त्तिकेवह्निस्नायीगायत्रीजपनिर राम

नः सकृद्देवदत्तविष्णाशीवत्सरकृत्वात्पापात्पूतोनवति॰ वाह्निर्गामोंगृहीत्वा अत्रचस्नानेप्रातःकालो
गंगंविष्णु॥ कार्त्तिकंसकलंमासंप्रातःस्नायीजितेंद्रिय जपन्हविष्यभुग्दांतःसर्वपापैःप्रमुच्यते एत
त्यजेदित्रतरूपत्वंतर्हिआर्द्रस्यशौचेनत्यागः व्रतपक्षेचाग्निपूज्यः मासंकार्त्तिकोग्निदेवताकव
चनात् नित्यस्नायीप्रातःस्नायीनित्यस्नानंमितिशरवोक्ते आधारचात्रस्नानंप्रधानंहविष्यनोजन
दिनागमितिसंप्रदायः फलस्तुतेश्चाविशेषात् सर्वान्वयेसर्वेषामधिकारः व्रतिनानि सामान्यजना
धिकरणकामिदंगंगामतिक्रम्यपाठात् कार्त्तिकमासस्नानेचातुर्मास्यफलंवक्ष्यते एतत्तंतोनरंश्च
नर्मधाकृविपर्ययंसायस्नानसंध्यासिनामिति अत्रचसौरमासइतिवक्ष्यते॥ नविष्णमहादेवऊचः माघेमासि
यदापष्ठ्यांशुक्लायांतवुधोनवेत् तदासातुमहापुण्यामहानाडीतिकीर्तिता तस्यांस्नानंजपोहोमस्तर्पणं
विप्रनोजनंमत्यीनरएकृतंदेविशतसाहस्रिकंनवेत् तस्मात्तस्यांमहादेविपूज्योहंविधिवत्नरैः गंधपुष्पो
पहारैश्चब्राह्मणानांचतर्पणैः पौषपौर्णमासीमधिकृत्य ब्रह्मपुराणे पुष्ययोगानुमार्गेचरोहास्नानंतुम

र्वदाः माघकृष्णाष्टमीसहस्रफलकेसुतं स्मृति अरुणोदयवेलायांशुक्लामाघस्यसप्तमी गंगायांयदिलभ्येत
सूर्यग्रहशतैःसमा। समोशतंसूर्यग्रहैःसमेतिपाठंतिप्रांचः तदनयोःपक्षयोश्चरमःशिष्टपरिगृहीतः गौडाः
सूर्यग्रहयातुल्या दिसुक्लामाघस्यसप्तमी तस्यांस्नानंचदानंचमहापातकनाशनं तथा अरुणोदयवेलायांय
स्यांस्नानंमहाफलं अत्रचार्कपत्रसप्तत्रयंचशिरसिनिधाय॥ ॐयद्यज्जन्मकृतंपापंमयाजन्मसुजन्मसु तन्मेरोगं
१७ चशोकंचमाकरीहंतुसप्तमी तिमंत्रेणस्नानं। ॐजननीसर्वभूतानांसप्तमीसप्तसप्तके सप्तव्याहृतिकेदेविनमस्ते
सूर्यमंडले अनेनार्घंदद्यात् शोकंछिंद्इं रोगमितिपाठांतरं समोन्यजलाधिकरणकमिदं मन्वंतरादिश्चेयंसप्तमी
माघस्याष्टम्यांदेवादितर्पणांनिर्वर्त्य भीष्मायतर्पणंदेवविधिनाकुर्वीत। वैयाघ्रपादगोत्रायसांकृतिप्रवरायच॥
अपुत्रायजलंदद्योनमस्तेभीष्मवर्मणे इतिनमस्काररहर्शनात् एतस्यगौडीयस्मृतिराचारोमूलंतदासर्वविष १७
यता असवर्णेजलदाननिषेधस्तुप्रकरणात् पित्रादिविषयः एतदपिसामान्यजलाधिकरणकमेव। नविष्टे॥
अष्टम्यांतयदात्वाष्टंष्यतीपातश्चवैतदागंगायांदुर्लभं स्नानंयोगोप्येषुसुदुर्लभः जोमाघेदैवयोगेनतद्दास्त्व
तिविधानतः लभतेचेत्ससद्योपिजातिंस्मरतिपौर्विकीं यद्यपिइहद्वसिष्टेन कृष्णाष्टम्यांयदात्वाष्टेतिपठि राम

तं तथापियोमाघइत्यादि भविष्यत्पुराणीयमुक्ता स्म्यामिवसन्स्नास्म्यां माघस्य।शयायो गत्वाद्ब्रह्मस्येनयोमाघ
इत्यादिवाशात् माघपूर्णिमायांतु अनंतफलकत्वंयुगादित्वंचवक्ष्यते ब्रह्मपुराणे माघस्ययोऽश्वनीर्वेद्वोर्मन्द्रामाघी
तिकीर्त्तिता विष्णु माघीमघायुक्ताचतस्यांशुद्धंकृत्वापूतोभवति निति शुद्धकालेपिमाघीविष्णुनापठिता देवीपुराणे
॥धेनगुडमयीमाघ्यांदयाद्देचोत्तरायणे सर्वान्कामानवाप्नोतिज्येष्टेजलमयींतथा यमः माघेमासितिलप्रवप्र
प्रज्ञामिपुरुषत्वंविंदति माघेमासिविशेषेण तस्मिंश्चैवतुविशेषतः माघमासि तिलान्यस्तु ब्राह्मणेभ्यः प्रयच्छति स
र्वसत्वसमाकीर्णंनरकंसनगच्छतिः माघेमासिग्निंप्रत्यहंतिलैर्हुत्वाधुतकल्मषाच्च ब्राह्मणान्भोजयित्वादीप्ता
ग्निर्भोवत् मत्स्यपुराणे माघेमास्युपसिस्नानंकृत्वादांपतिमर्चयेत्भोजयित्वातथाशक्त्यामाल्यवस्त्रविभूषणैः
सूर्यलोकेवसेत्कल्पंसूर्यव्रतमिदंस्मृतं इतिमत्वाकेवलमाघस्नानेप्रमाणं श्रीदत्तोपाध्यायैरनमतंतत्रादंपतिपूजा
चरणंउक्तं एवंचारम्भ माघस्नानस्याशौचेनत्यागः ब्रह्मपुरत्वात् एतत्सर्वसामान्यजलाधिकरणं माघस्नानंचातु
र्मास्यफलकमितिगंगाधिकरणकेमितिव्रतांतरमेव भविष्ये नैरंतर्येण गंगायांमाघेयःस्नातिमानवः सशक्रलो
केसचिरंकालंस्थित्वासगोत्रजैः ततोब्रह्मपुरेतिष्टेत्कल्पकोटिशतायुतं अत्रापिसौरमासपरिग्रहः शिष्टाचारा त

मध्यदेशीयाः पठंति

अमार्कपातश्रवणैर्युक्ता चेत्पौषमाघयोः अर्धोदकः स विज्ञेयः सूर्यग्रहशताधिकः पातो व्यतीपातः मघाधिक

रे गरुडे ॥ मातरं पितरं चापि भ्रातरं सुहृदं गुरुं यमुद्दिश्य निमज्जेत द्वादशांशं लभेत सः पाद्मे मकरस्थे रवौ माघे

गोविंदाच्युत माधव स्नानेनानेन मे देव यथोक्तफलदो भव इति मंत्रं समुच्चार्य स्नानान्मौनेन समाश्रितः वासुदेवं

हरिं कृष्णं माधवं च स्मरेत्पुनः तप्तेन वारिणा स्नानं यद्गृहेपि कृतं नरैः षड्वर्षं च फलं तद्धि मकरस्थे दिवाकरे अ

१८ शक्तौ वैतत् स्वगृहे स्नानं तु वाप्यादौ द्वादशाब्दफलं स्मृतं तडागे द्विगुणं राजन् महानद्यां च संगमे सहस्रगुणितं ।

सर्वं तत्फलं मकरे रवौ गंगायां स्नानमात्रेण लभते मानुषो नृप गंगायां चावगाहेति माघे मासि नराधिप च

तुर्युगसहस्राणि तेन न पतंति सुरालयात् दिने दिने सहस्रं तु कपिलायुतमेव च तेन दत्तं हि गंगायां यो माघे स्ना

ति मानवः प्रकरात्मासः स्नानकालीनफलमेतत् तथा च स्कांदे मकरस्थे रवौ यो हि न स्नात्यनुदिते रवौ क

थं पापात्प्रमुच्येत कथं स त्रिदिवं व्रजेत् मकरस्थे रवौ माघे प्रातःकाले तथामले गोपादेपि जले स्नानं स्वर्गा

३७ अप्रमत्तोद्विजः तीर्थेयःप्रतिगृह्णीयात् तीर्थेचायतनेषुचहिरण्यंरजतंताम्रंयद्वस्तुस्वादुकिंचन स्वकार्येपितृकार्येचदेवताभ्यर्चने
वानिष्फलंतस्यतत्तीर्थं यावत्तद्धनमश्नुते तीर्थेप्रतिगृहीतस्तुतद्धने यावत्स्त्वमनुवर्त्तते तावत्तीर्थस्नानादौकोटिगुणत्वादि
स्वस्वफलंजनयति तद्धनत्यागात्स्वफलंजनयत्येव तीर्थेनप्रतिगृह्णीयादित्यनेनबाधितं नेषेधास्त्वर्वेषुनरवतिष्ठतएवतद्धन ३७
त्यागेनतीर्थफलजनकत्वमात्रनिवृत्तेरितिवर्द्धमानेनवचनात् तथागंगायांविक्रियाद्वाजन् विष्णोर्विक्रयणंभवेत् जनार्द्दने
तुविक्रीतेविक्रीतंभुवनत्रयं अथव्रतं भविष्ये अष्टमूर्तिधरांगंगांदिव्यरूपांनिरीक्षतुंसाक्षाद्देवातिमर्त्यानांतमुपाव्रतंवद शालि
तंदुलप्रस्थेनद्विःप्रस्थपयसातथापायसंपाचयित्वातुमंडलंचहुतंतथाप्रत्येकफलमात्रंतुतत्रनिःक्षिप्यभक्तितः तत्पा
यसमन्वयंचमोदकंमंडकानिच तथागुंजार्द्धमात्रंतुसुवर्णरौप्यमेवचचंदनागुरुकर्पूरकुंकुमानिगुग्गुलं विल्वपत्राणिदूर्वा

प्र

गोरोचनो सितं चंदनं नीलोत्पलानि पुष्पाणि केलाभेद फलानि च यथाशक्त्या महाभक्त्या गंगायां यो विनिक्षिपेत्
मासि मासि पूर्णमास्यां दर्शे च ग्रहणद्वये शुद्ध्या नेन मंत्रेण यावत्संवत्सरं तथा ॐ गंगादेव्यै नारायण्यै शिवा
यै ते नमो मैं नमः इति मंत्रेण सततं शतमष्टोत्तरं जपेत् गंगाजलो स्थित्वा च तन्मना शिष्क्षं न संशयः हविष्याशी मिताहारो
यमी ते षु दिने दिने संवत्सरांते तस्येषा गंगा दिव्यवपुर्द्धरा दिव्यमाल्यांबरधरा दिव्यमाल्यानुलेपना चारुरूपधरा देवी दिव्यरत्न
रत्नविभूषणा प्रत्यक्षीभूता पुरतस्तिष्ठत्येव वरप्रदा एवं प्रत्यक्षतः साक्षाद्गंगां दिव्यवपुर्द्धरां दृष्ट्वा तु चक्षुषा मर्त्यो वरदान
मनुचिंतां यान यान् कामयते कामान् स्तान् स्तान् सर्वान् समश्नुते निर्मलस्तु परं मोक्षं लभेतानेन जन्मना तथा शृणुध्वं
भक्तितो यं वक्ष्यामि मुनिपुंगवाः सर्वव्रतानां राजानं धर्मव्रतमनुत्तमं वृषध्वजेन कथितं शिवेनापि च यत्पुरा श्रीत्यादे
वाय तुष्टेन गंगातीरनिवासिना देवैस्तु भुक्तं पूर्वाह्णे मध्याह्ने ऋषिभिस्तथा अपराह्णे च पितृभिः सर्वयोगुह्यकादिभिः
सर्वे वेलामतिक्रम्य नक्तभोजनमुत्तमं जपवासात्परं भैक्ष्यं भैक्ष्यात्परं याचितं अयाचितात्परं नक्तं तस्मान्नक्तेन वर्त्तयेत् ह
विष्यभोजनं स्नानं सत्यमाहारलाघवं अग्निकार्यमधः शय्यां नक्तभोजी षडाचरेत् गंगातीरे माघमासे यः कुर्यान्नक्तभो
जनं शिवायतनपार्श्वे तु कृशरं घृतसंयुतं नैवेद्यं विनिवेद्यै व कृशरान्नं शिवस्य तु काष्ठमौनेन भुंजानो जिह्वालोल्यं वि
वर्जयेत् पालाशपत्रे भुंजानः शिवं स्मृत्वा विशेषतः धर्मराजस्य देव्याश्च षट्पक्षपिंडास्तु कल्पयेत् सोपवासश्च तुदर्शयां
भवेद्रुमयपक्षयोः पूर्णमास्यां तु गंधैश्च गंगयाः सलिलैस्तथा स्नापयित्वा विशेषेण मधुना च स्वशक्तितः तथैव हेमपरं च लिंगं
मूर्द्ध्नि विसर्जयेत् ततो दद्यात्स्वपा[illegible]क्तोयेव शिवाय घृतकंमलं एकांगेच कृष्णतिलं शिवलिंगोपरि क्षिपेत् नीलोत्पलैश्च स

वैश्च पूजयेत् पंकजैरपि अलंकारयेद्‌ब्रह्मा मासमात्रेण चोत्पलं पापसंचात्र विधिना घृतयुक्तं च गुग्गुलं घृतप्रदीपं च तथा चंद
नाद्यैर्विलेपनं दद्यात्स्वशक्तितो भक्त्या तथा पत्र फलादिकं कुसुमं गोमिथुनं चैव सरौप्यं च निवेदयेत् भोजयेद्ब्राह्मणा
नष्टौ मासांते तु सदक्षिणां वर्जयेत्तं मधु मांसं च तं मासं ब्रह्मचर्यवान् एवं कृत्वा यथोद्दिष्टमेकवारमिदं व्रतं यमनिय
मसंपन्नः श्रद्धाभक्तिसमन्वितः इह भोगानवाप्नोति प्रेत्य चानुत्तमां गतिं इंद्रनील प्रतीकाशे विमाने शिखिसंयु
ते दिव्यरत्नमयैश्चैव दिव्यभोगसमन्वितेः गत्वापि पुरं रम्यं ससर्वकुलसंयुतः सुहृद्भिर्बंधुभिश्चैव तस्य फलमभाषि पति ६
३८ तं भुक्त्वा भोगानशेषांश्च यावद्दाहूतसंप्लवं ततो भवति धर्मात्मा जंबूद्वीपेत्तया तत्र भुंक्ते समस्तांश्च भोगान्निहतकंटक
सुरूपः सुभगश्चैव अतिरस्कृतशासनः सर्वरोगविनिर्मुक्तः सोपीह फलमाप्नुयात् इदं धर्मव्रतं नाम नदेयं यस्य कस्य
चित् नास्तिकस्य कुतर्कस्य संशयाविष्टचेतसः आस्तिके श्रद्धादाने च देवब्राह्मणपूजके सुकुतर्कविहीने च क ३८
थितव्यं प्रयत्नतः

तथा वैशाखे त्वशुक्ले कृष्णपक्षस्य चतुर्दशीं समाहितः। शाल्योदनं क्षारयुक्तं यः कुर्यान्न तु भोजनं। शिवं संपूज्य गंधाद्यैर्भो
ज्यं च विनिक्षिपेद्गां च काष्ठं मौनेन संयुक्तो वटकाष्ठेन वै ततः। मौनेन प्रयतो भूत्वा कुर्याद्वै दंतधावनं शिवलिंगसमीपे तु गंगा
तीरे निशि स्वपेत्। पूर्णिमास्यां प्रभाते तु गंगायां विधिना तथा स्नातोपवासं संकल्प्य कुर्याज्जागरणं निशि। लिंगं घृतेन स्ना
प्याय पुष्पगंधादिभिस्तथा नैवेद्यपुष्पधूपैश्च संपूज्य वृषभं शुभं अश्वेतपुष्पवस्त्राद्यैर्हरिद्राचंदनैस्तथा अलंकृत्य विधाने
श्च शिवाय निवेदयेत्। ब्राह्मणांश्च यथाशक्ति पायसेन तु भोजयेत्। एकं मासं च यो भक्त्या करोति त्वरयान्वितः। स लभेद्दे
कपादेन युगानां द्विसहस्रकं तपः। कृत्वा तु नियमान्नित्यं पुण्यं तदसंशयं हंसयुक्तविमानैश्च पूर्णचंद्रसमप्रभैः। संखेन वृष
मं पुस्तैर्मुक्ताजालविभूषितैः। स्वकीयपितृभिः सार्द्धं प्रयातीश्वरमंदिरं नीलोत्पलसुगंधाभिः समंततः। कांताभिर्दिव्यरूपा
भिर्भुक्त्वा भोगानशेषतः। अनंतकालमैश्वर्ययुक्तो भूत्वा ततो भुवि जायते स महीपालः। कांतिरूपसमन्वितः। एकच्छत्रां महीं स
र्वीं पालयित्वाऽन्यया सह अंते वैराग्यसंपन्नो गांगतो भुजतेऽपुनः। स तथा श्रद्धयायुक्तो गंगायां मरणं लभेत्। तथा तत्र स्मृ
तिं लब्ध्वा मोक्षमाप्नोति स ध्रुवं तथा ज्येष्ठमासि सितेपक्षे दशमीहस्तसंयुते गंगातीरे तु पुरुषो नारी वा भक्तिभावतः। निशि
जागरणं कुर्यात् गंगां दशविधैस्तथा पुष्पैर्गंधैश्च नैवेद्यैः फलैश्च दशसंख्यया तथैव दीपैस्तांबूलैः पूजयेत् श्रद्धयान्वि
तः कृत्वा भक्तिं च गां कृत्वा दशाकृत्वो विधानतः। दशप्रसृतिकृष्णांश्च तिलान् सर्पिश्च वै जले शक्तु पिंडान् गुडान्वयान्

घाद्य दशसंख्यया ततो गंगातटे स्थित्वा हेम्ना रौप्येन वा तथा गंगायाः प्रतिमां कृत्वा वक्ष्यमाणस्वरूपिणीं पद्मस्वस्तिकचिह्नस्य संस्कृतस्य
तथोपरि वस्त्रस्य ग्रामकंठस्य पूर्णकुंभस्य चोपरि संस्थाप्य पूजयेद्देवीं तदलाभे मृदापि वा अथ त्रयाप्यशक्तश्चेल्लिखेत् पिंडेन वै भुवि।
चतुर्भुजां सुवेशां च सर्वरत्नविभूषितां रत्नकुंभसिताम्भोजवराभयकृत्करां श्वेतवस्त्रपरिधानां मुक्तामालाविभूषितां ततो ध्यायेत्सुसौम्यां
चंद्रायुतसमप्रभां चामरैर्वीज्यमानां च श्वेतच्छत्रोपशोभितां स्वभक्तानां च वरदां करुणार्द्रनिजांतरां सुधाप्लावितभूपृष्ठां देवादिभिरभि
ष्टुतां दिव्यरत्नविभूषां च दिव्यगंधानुलेपनां ध्यात्वैं त्वानलेतथा प्रोक्तां तथाचर्यां विधानतः वक्ष्यमाणेन मंत्रेण कुर्यात्पूजामशेषतः पं
३२५ चामृतेन च स्नानं मंत्रपूतेन शिष्यते समीकृत्य स्थंडिलं तु गोमयेनोपलेपयेत् नारायणं महेशं च ब्रह्माणं भास्करं तथा भगीरथं च नृपतिं हिम
वंतं नगेश्वरम् गंधपुष्पादिभिश्चैव यथाशक्ति प्रपूजयेत् दशप्रस्थान् तिलान्दद्यात् दश विप्रेभ्य एव च दशप्रस्थान् यवान् दद्यात् ३२
दशगाव्योगवाहितान् मत्स्यकच्छपमंडूकान् मकरादिजलेचरान् कारयित्वा यथाशक्तिः स्वर्णेन रजतेन च तदभावे पिष्टमयानभ्यर्च्य कु
सुमादिभिः गंगायां प्रक्षिपेद्राज्यं दीपांश्चापि पृथक् विधान् यात्रादिने तस्मिन् विभवे सति कारयेत् एवं कृत्वा विधानेन वितसाद्य वि
वर्जितः दशपापैर्वक्ष्यमाणैः सद्य एव विमुच्यते अदत्तानामुपादानमित्यादिदशहरायां लिखितैर्दशविधैः पापैः कोटिजन्मसमुद्भवैः
मुच्यते नात्र संदेहो ब्रह्मणो वचनं यथा एकविंशशतान् सर्वान् पितॄनेव तथापरान् उद्धरत्येव संसारान्मंत्रेणानेन पूजयेत् ॐ नमो
नारायणाय दशहरायै गंगायै नमः इति मंत्रेण यो मर्त्यो गंगां ध्या दिवानिशं दशजन्मसहस्राणि दशधर्मफलं लभेत् गंगादशपूर्वा

स्वकुलं चैव भवार्णवात्। कंठाभरणमिदं स्तोत्रं जपेत् विधानात्स्त्वति गृह्य गंगातटे दिनेनेन श्रद्धि। प्रजां प्रवर्द्धयेत्। ॐ नमः शिवायै
गंगायै शिवदायै नमो नमः। शांतायै पापहारिण्यै ब्रह्ममूर्त्यै नमोस्तु ते नमस्ते हररूपिण्यै गंगायै ते नमो नमः। सर्वदेवस्वरू
पिण्यै नमो भेषजमूर्त्तये सर्वत्र सर्वव्याधीनां भिषक् श्रेष्ठ्यै नमोस्तु ते स्थाणुजंगमसंभूतविषहंत्र्यै नमोस्तु ते संसारविषनाशि
न्यै जीवनायै नमोस्तु ते तापत्रयहंत्र्यै च प्राणमूर्त्यै नमो नमः। शांतिसंतानकारिण्यै नमस्ते शुद्धमूर्त्तये सत्वसंशुद्धिकारि
ण्यै नमः पापारिमूर्त्तये भुक्तिमुक्तिप्रदायिण्यै भद्रायै ते नमो नमः। भोगोपभोगदायिन्यै भगवत्यै नमोस्तु ते मंदाकिन्यै नमो-
स्तु स्वर्गदायै नमो नमः। नमस्त्रैलोक्यभूतायै त्रिपथायै नमो नमः। नमस्त्रिलोकसंस्थायै क्षेमवत्यै नमो नमः। त्रिंशदासनसंस्था
यै तेजोमूर्त्यै नमो नमः। नंदायै लिंगधारिण्यै नारायण्यै नमो नमः। नमस्ते विश्वमित्रायै रेवत्यै ते नमो नमः। तंत्रायै सुखजन्यायै संजि
विन्यै नमो नमः। ब्रह्मेशायै ब्रह्मदायै दुरितघ्न्यै नमो नमः। प्रणतार्त्तिप्रभंजन्यै जगन्मात्रे नमो नमः। निस्तुषायै दुर्गहंत्र्यै दक्षायै ते नमो न
मः। सर्वपत्स्वतिपक्षायै मंगलायै नमो नमः। परावरे नमस्तुभ्यं नमस्ते मोक्षदे सदा गंगा ममाग्रतो भूयात् गंगा मे पार्श्वतस्तथा गंगा मे
सर्वतो भूयात् त्वयि गंगे स्तु मे स्थितिः। आदौ त्वमंते मध्ये च सर्वलोकप्रिये शिवे त्वमेव मूलप्रकृतिस्त्वं हि नारायणः प्रभुः। गंगे त्वं पर
मात्मा च शिव तुभ्यं नमः। शिवे इतीदं पठते स्तोत्रं नित्यं भक्तो पदो द्विय। शृणोति श्रद्धया यश्च कायवाक्चित्तसंभवैः। दशधा संस्थि
तैर्दोषैः सर्वैरेव विमुच्यते जगस्थो मुच्यते रोगादापद्भ्यश्च तथापदः। द्विषद्भ्यो बंधनाद्वैश्च सर्वैरेव विमुच्यते सर्वान् कामानवाप्नोति
प्रेत्य ब्रह्मणि लीयते इदं मंत्रं गृहे यस्तु लिखित्वापि विनिःक्षिपेत् नाग्निचौरभयं तस्य पापेभ्योपि भयं न हि तस्यां दशम्यामेतत्तु स्तोत्रं

गंगाजले स्थितः। यः पठेद्दशकृत्वस्तु दरिद्रो वापि चाक्षमः। सोपि तत्फलमाप्नोति गंगां संपूज्य यत्नतः। सर्वोक्तेन विधिनेन फलं यत्परिकीर्त्ति-
तं यथा गौरी तथा गंगा तस्माद्गौर्यास्तु पूजने विधिर्यो विहितः सम्यक् सोपि गंगाप्रपूजने यथा शिवस्तथा विष्णुस्तथा उमा यथा ग-
तथा गंगा च रूपं न भिद्यते विष्णुरुद्रान्तरं यद्वद्गंगागौर्यन्तरं तथा श्रीगौर्यन्तरं यद्वद्ये ब्रुवते स मूढधीः। इति श्रीकण्ठाभरणस्तोत्रं। अ-
थ निषिद्धानि। भविष्ये गंगाभक्तो नरस्त्वप्सु श्लेष्ममूत्रमलसंचयान् उत्संगे न क्षिपेच्चापि हस्तपादेन ताडयेत्। तथा गंगां पुण्यजलां
प्राप्य त्रयोदश विवर्जयेत्। शौचमाचमनं स्नानं निर्माल्यं मलवर्षणं गात्रसंवाहनं क्रीडां प्रतिग्रहमथो रतिं अन्यतीर्थरतिं चैव अ-
५० न्यतीर्थप्रशंसनं वस्त्रत्यागमथो तद्वत्संभारांश्च विशेषतः। स्कान्दे नाभ्यंगतः प्रविशेत गंगायां न मलार्दितः। न जल्पन्न मृषा जल्प-
न्न वदन्ननृतं नरः। अविहितजल्पनं निष्प्रयोजकजल्पनं असदर्थजल्पनं च निषिद्धमित्यर्थः। ब्राह्मे स्नायी तैलवान विप्रस्त-
श्रीः रभूमिमुपेयिवान्। स्कन्दे आधिक्यं सर्वतीर्थेभ्यो गंगायास्तु वदन्ति ये अल्पविद्यामदोन्मत्तास्ते वै निरयगामिनः। शिवं विष्णुं च ५०
गंगां च यो द्वेष्टि पुरुषाधमः। स्वकथ्यपितृभिः सार्द्धं स घोरं नरकं व्रजेत्। तथैव गौरीं लक्ष्मीं च गंगां भानुं सरस्वतीं ब्रह्माणं चैव
यो द्वेष्टि स घोरं नरकं व्रजेत्। गंगां वै येन संवेत्ते मूढास्ते तमसा वृताः। जठरस्त्रासृक्पुरीषश्लेष्मसंचये पूयायशुचिसत्ताने श्रीः
विष्ठाकीर्णत्रसंकुले पुनः। प्रजायन्ते श्रद्धया रहितास्सदा परमात्मा शिवो ह्यन्यस्तस्मादन्या तु जाह्नवी इति यो वक्ति मूढात्मा स न
मोक्षस्य भाजनं। तथा गंगां प्राप्य तु ये मर्त्याः प्रीयन्ते न रमन्ति च न वारयेत्तान्। गंगाभक्तान्पापरतांस्तथा माहात्म्ये गंगां प्राप्यापि ये
मर्त्याः श्रद्धां भक्तिं न कुर्वते तीर्थे नरेन्द्र कुर्युस्ते ते वै निरयगामिनः। तथा सर्वोत्तमां महादेवीं सर्वोत्कृष्टां वरप्रदां अन्यतीर्थस-
मां कुर्युस्ते वै निरयगामिनः। भागीरथीं महापुण्यां गंगां त्रिपथगामिनीं अन्यतीर्थसमां मत्वा कुंभीपाके निमज्जति अन्य

१०

तीर्थसमां गंगां यो ब्रवीति नराधमः स याति नरकं घोरं रौरवं दारुणं महत् गंगातीरं परित्यज्य ये ऽन्यतीर्थाभिलाषिणः ब्रह्म
हत्याफलं तेषां मम तं संशयात्मनां भविष्ये गंगातीरं परित्यज्य ये ऽन्यतीर्थाभिलाषिणः तयोंतरे रतिर्येषां ते वै निरयगामिनः
यमः स्तुतिवादोयमितिमन्यन्ते पुरुषाधमाः कुतार्किकाः मूढधियस्ते वै निरयगामिनः पिसमूर्पः स्याच्छक्ति पुक्तोप्य
शक्तिकः यस्तु भागीरथीं गंगां सुखं सेव्यां न पश्यति किमन्यैः कर्मभिः षड्भिस्तस्य किं श्लाघ्य जन्मनाकिं श्रियाति विकारि
न्याय स्तु गंगां न पश्यति अथ मरणप्रकरणं विष्णुवाक्यं ये मुंचंति नराः प्राणांस्तिष्ठंतः सन्निधौ तत तेमे लोके प्रयस्यां
ति पूज्यमाना दिवौकसां अर्द्धोदके न गाङ्गेयां म्रियेतानशनेन यः स याति न पुनर्जन्म ब्रह्मसायुज्यमेति च बृह
स्पतिः शुक्ले पक्षे दिवा भूमौ गंगायामुत्तरायणे धन्या देहं मुंचंति हृदयस्थे जनार्दने। ब्रह्मपुरा
णे या गति र्योगयुक्तस्य मनुष्यस्य मनीषिणः सा गतिस्त्यजतः प्राणान् गंगायां तु शरीरिणः अन
शनं गृहीत्वा यो गंगातीरे नरो मृतः स एव परमं स्थानं प्राप्नोति पितृभिः सह गंगायां मरणं प्रा
प्तः संसारं त्यक्तुमिच्छति शतानि बहुजन्मानि यत्र तत्र मृतस्य च महांश्चापि गतः कालो यत्र तत्रापि श
श्वतः अतिदूरे समीपे च सदृशं योजनद्वयं गंगायां मरणं ज्ञेयं नात्र कार्या विचारणा। एतद्वचनबला
त तद्वये एकैकयोजनं मरणे पुण्यतमामिति स्मरव्यं ज्ञानतो ऽज्ञानतो वापि कामतो ऽकामतो पि वा गं
गायां तु मृतो मर्त्यः स्वर्गं मोक्षं च विंदति। विष्णुपुराणे प्राणेषूत्सृज्यमानेषु गंगायां यः स्मरेन्न
रः स्यूशे हा पापशीलो वा स याति परमां गतिं या गतिर्ज्ञानिनां नित्यं सा नां या गतिर्योगिनामपि ज्ञान

विज्ञानानि ष्ठानां सा गंगायां मृतस्य च कृमिकीटपतंगाद्याये मृता जाह्नवी जले कूलात्परिच्युताश्च
तास्तेपि यांति परां गतिं । ब्रह्मविष्ण्वादिदेवानां लोकानाप्नोति मानवः । ज्ञानेन तस्यां गंगायां मरणा
न्मोक्षमाप्नुयात् । अपि योजनपर्यंते गंगां स्मृत्वा तनुं त्यजेत् । नैव स्वर्गतापि तस्याघं दत्वा स्वर्गं प्रयच्छति
। यदि गंगाजलौघेन प्लावयित्वा कलेवरं तदा तन्मयतां याति मृत्युकाले विशेषतः । स्कांदे । गंगायां
मरणान्मुक्तिर्नात्र कार्या विचारणा । परं ब्रह्मस्वरूपिण्या मित्याह जगतां पतिः । गंगायां त्यजतः प्रा
२८५ णान्कथयामि वरानने कर्णे तत्परमं मंत्रं ददामि परमं पदं । भविष्ये । गंगायां ज्ञानतो मृत्वा मुक्तिमा
प्नोति पूरुषः । अज्ञानी ब्रह्मणो लोकं याति नास्त्यत्र संशयः । गंगायां मरणमात्रेण मुक्तिः ज्ञानपूर्वक
मरणेन च मुक्तिरित्यविरोधी पदार्थः । अज्ञानात् कामनाविशेषमरणात् कामनाविशेषब्रह्मलोक
मिति पारस्करदर्शनात् । कर्णे तत्परमं ब्रह्म कथयामि मि वरानने नन्नरः परस्वरसाचैतिविद्या
पात्पुपाध्यायाः । अथास्थिप्रकरणं विष्णुपुराणे । शंभोर्जटाकलापान्तु विनिःक्रांतास्थिपश
करः प्लावयित्वादिवं निन्ये सापापान् सगरात्मजान् । यमः गंगातोयेषु यस्यास्थि प्लवते शुभक २८४
णः न तस्य पुनरावृत्तिर्ब्र

ह्मलोकात् कथंचन दृश्या ह्यभ्यंतरे यस्य गंगा तोये स्थि मज्जति गंगायां मरणे यादृक् तादृक् फलमवाप्नुयात् कौर्म्ये यावंत्य
स्थीनि गंगायां तिष्ठंति पुरुषस्य च तावद्वर्ष सहस्राणि ब्रह्मलोके महीयते भविष्ये गंगातोयेषु यस्यास्थीनि न्यासं क्षिप्यते नरैः
युगानां तु सहस्राणि तस्य स्वर्गे भवेत् स्थितिः ब्रह्मांडे यस्मिन्काले नराणामस्थि गंगायां क्षिप्यते नरैः तत्कालमादितः कृत्वा
तस्य स्वर्गे भवेत् स्थितिः तावत् युगसहस्राणि मुनात्र कार्या विचारणा वनपर्वणि यावदस्थि मनुष्यस्य गंगायाः संस्पृशेज्जलं
तावत्स पुरुषो राजन् स्वर्गलोके महीयते ब्रह्मपुराणे स्नात्वा ततः पंचगव्येन सिक्त्वा हिरण्यमध्वाज्य तिलैर्नियोज्य ततस्तु मृत्पि
ंडपुटे निधाय पश्यन् दिशं प्रेतगणोपगूढां नमोस्तु धर्मराजाय वदन् प्रविश्य जलं स मे प्रीत इति क्षिपेच्च एवं स्थिते प्रेतपुरस्थित
स्य स्वर्गे गतिः स्यात्तु महेंद्रतुल्या ॥ अथ केशनखभस्मादिपतनफलं ब्रह्मांडे केशरोमनखादीनि येषां पुंसां तु यामुना निक्षि
प्य ते च गंगायां तेषां स्याद्दिवि संस्थितिः विष्णुपुराणे मृतस्य प्राणस्यास्थिभस्मस्नायुकेशाद्युत्सृष्टयत्तु पतितं तस्य द्यः शरीरिणां
स्वर्गं नयंति महाभारते भस्मीभूतांगसंगेन स्वर्गता सगरात्मजाः किं पुनः सर्वदा देवीं ये सेवंते दृढव्रताः रामायणे भस्मन्य
प्याप्लुते तेन राजेंद्रेण नरोत्तम सर्वलोकेकृतो ब्रह्मा राजानमिदमब्रवीत् तारिता निनृपश्रेष्ठ दिवं याता निदेववत् षष्टिपुत्र
सहस्राणि सगरस्य महात्मनः ॥ ॥ इति गंगाभक्तितरंगिण्यां प्रथमस्तरंगः ॥ ॥ शिवः सर्वं अघि गंगमनंगवैरिणः पदप
केरुहमर्चयाम्यहं यमकिंकर किं करिष्यसे मम शोषुभ वपुष्टो रुषारट श्रीरत्नपाणेः पद्यमिदम् अपोद्घात प्रसंगाद्यो व्यवस्था
प्राग्गुराहृता इदानीं च निरूप्यंते कान्श्चित्प्राधान्यतः पुनः तथाहि गंगादर्शनस्पर्शनस्मरणादिभिः पंचमहापातकादिस

र्वपापक्षयो मुक्तिफलत्वेन श्रुतिस्मृतिपुराणादिषु बहुशः श्रूयते तत्र कतिपये तैर्थिकाभासा यथाश्रुतार्थविपरीतार्थं कल्प
यंति तथाहि नहि स्नानमात्रेण ब्रह्मवधादिपातकनिवृत्तिः बहुवित्तव्ययसाध्यप्रायश्चित्तस्याननुष्ठानलक्षणाप्रामाण्यप्र
संगात् नच गंगाविहारिणी देशे तत्प्रवृत्तिः गंगास्नानेन तत्पापविमुक्तेः प्रायश्चित्तानि दीयंते यत्र गंगा न विद्यत इत्यादि
दर्शनादिति वाच्यं गंगासन्निहितदेशेपि शिष्टानां कृतपापनुत्तये प्रायश्चित्तप्रवृत्तिदर्शनात् न च लोकसंग्रहार्थं प्रवृत्तिः गंगास्नाने
न तत्पापविमुक्तिसिद्धेः लौकिकसंग्रहस्यापि तावतैव संभवात् एवं चाश्वमेधफलकत्वमपि नोपपद्यते अश्वमेधे प्रवृत्त्यापत्तेः किं
१५८ च सर्वपापक्षयहेतुके गंगास्नाने कृतेप्युत्तरक्षणे पापसाध्यं तत्तदुःखमनुभूयत इति त्वयापि सर्वपापक्षय इत्यस्यार्थांतरं कल्प
नीयमेव । किं च गंगास्नानादिनैव सर्वपापनाशेनागम्यागमनादौ स्तेयादौ च कथं न लोकाः स्वच्छंदेन प्रवर्त्तेरन् गंगास्ना १५८
नेनैव तस्यापि पापनाशात् यत्र मुक्तिफलं श्रूयते तदपि नोपपद्यते को हि गंगादर्शनमात्रसाध्यमुक्तिनिमित्तं चतुर्थाश्रमेण
तमेनमच साधयेत् को वा श्रवणमननादौ प्रवर्त्तेत किमर्थं वाराणसीमरणार्थं यतेत किं च सद्दर्शनेपि सर्वपापविमुक्तौ किं
दर्शनस्नानाद्यर्थं भूयो भवद्भिः प्रयत्नैः एकेनैव फलसिद्धेः तस्माद्ब्रह्मवधादिपापनिवृत्तिरित्यस्य वानरं कनिनं सर्वं हत्वा ब्र
वधी भवेत् वृत्तिकेशेपि तद्वदित्यादिना बोधितातिदैशिकब्रह्मवधादिपातकनिवृत्तिरित्यर्थोस्तु जन्मांतरीयब्रह्मवधादिना
शोमास्तु प्रायश्चित्तानुपदेशात् अश्वमेधसमफलत्वमपि यथाकथंचिन्मुखचंद्रयोरिव साम्यमिति तात्पर्यमस्तु सर्वपापक्षय
इत्यस्य सर्वजातीयपापनाश इ। त्यर्थोस्तु एवं तीर्थेष्वावृत्तिरपि युज्यते यत्रापि जन्मार्जितस्य जन्मसहस्रस्य वा पापनिवृत्तिः श्रूयते

तत्रापि तावत्कालीनवपमानाधर्मनाशमात्रमर्थो न तु सकलतन्नाशः मुक्तिप्रतिपादकवाक्यानां तु मरणप्रकरणाम्नातानां वाराणसीपरत्वं ज्ञानपूर्वकमरणपरत्वं वा गंगायां ज्ञानतो मृत्वा मुक्तिमाप्नोति पूरुष इत्यादि ब्रह्मपुराणीयवचनसुरसात् दर्शनस्पर्शनवप्रकरणप्रामाण्येन गंगासन्निहितानां दर्शनादिना स्नानादिना च तत्तत्पापनिवृत्तिर्नतु ततो विप्रकृष्टानामिति गंगाविरहप्रविवदेशे प्रायश्चित्तप्रवृत्त्या वप्रामाण्यशंकानिरासात् प्रायश्चित्तानि नीयंते यत्र गंगा न यत्र गंगा महाराज प्रायश्चितं तु तत्र स्याच्चांद्रायणं पराकं वा ज्ञानात्प्रत्यमथापि वा प्रायश्चित्तप्रवृत्ताव निरीयंते यत्र गंगा न विद्यते कृत्वाति दुस्तरं कर्म मज्जेत् गंगां भक्तितः प्रियेत तत्क्षणादेव नश्यंति पापमुदिश्य मज्जनात् नान्येन दह्यते लोके क्रिया नरकगामिनी गंगां भक्तिप्रयत्नेन स्नातव्यं तेन मानवैः ब्रह्मघ्नो वा सुरापो वा गोघ्नो वा पंचपातकी सर्वतो निःक्रितिं याति गंगास्नानात् नात्र संशयः इत्यादिना कं एत एवप्रपादनात् गंगायां संनिहिते देशे शिष्टाः कथं बहुव्यायामसाध्ये प्रायश्चित्ते प्रवर्त्तंत इति तु शक्यते वक्तुं अत्र केचित् एनसि लघुनि लघुरूणि गुरूणि प्रायश्चित्तानीति तत्र पाद्मे पापकृद्याः लघुनि कर्मणि न गुरुकर्मणो विद्यातें यदाह विष्णुः एनसि लघुनि लघुरूणि गुरूणि प्रायश्चित्तानीति तत्र पाद्मे पापकृद्या तिनरकं प्रायश्चित्तपराङ्मुखः किं तु पापानुरूपाणि प्रायश्चित्तानि तत्तथा तथा तथैव संस्मृत्य प्रोक्तानि परमर्षिभिः पापे गुरूणि गुरूण्येव स्वल्पान्यल्पे च तद्विदः प्रायश्चित्तानि विप्रेंद्र जगुः स्वायंभुवादय इत्यादिसुरसात् गंगातीरे गरीयसी कथं प्राय श्चित्तापगम्यतां तथा हि पाद्मे धर्मद्रवं ह्यपां बीजं वैकुंठचरणच्युतं धृतं मूर्ध्नि महेशेन यद्गंगममलं जलं तद्ब्रह्मैव न संदेहो निर्गुणं प्रकृतेः परं तेन किं समतां गच्छेदपि ब्रह्मांडगोचरे गंगा गंगेति यो ब्रूते योजनानां शतैरपि नरो न नरयं याति किं

तयासदृशो भवेत् स्कांदे गंगायाः सदृशं तीर्थं दपिब्रह्मांडगोचरे इति योवक्ति मूढात्मा सर्वधर्मबहिःकृतः सगरद्रौरवं विशे
यावदाहूतसंप्लवं तथा शिष्टतंत्रे तावन्नपातकं कर्त्तुंशक्ताः पातकिनो नराः गंगायात्र भवेत्तुल्यं प्रायश्चित्तंत्रिवोवदेत् इति
बहुतरवचनस्वरसात् गंगाप्रायश्चित्तत्वेनोपदिष्टव्यानभवति अनुपदिष्टायाश्च शिष्टास्तत्प्रायश्चित्तानितिरस्कृत्य कथं गंगात
४२ त्वेन प्रवर्त्तेतामिति नतुलघुनिलघूनि गुरूणि गुरूणि प्रायश्चित्तानीति तत्त्वं गंगासर्वतोगरीयसीत्यपिहितत्त्वं किंतुप्रयत्नवि
तव्ययैर्गौरवं लाघवं चविचार्यते नहि गंगाप्रायश्चित्तं किंतु तत्सर्वं निर्देशेन स्पर्शेन स्नानादिषु तत्प्रायश्चित्तेषु च कुत्रलाघ
वं गौरवमिति विचारे गंगादर्शनस्यैवलाघवात् अपरेतु रामयुधिष्ठिरप्रभृतीनां ब्रह्मवधादिनिवृत्तिनिमित्तं गंगादर्श
नेप्रवृत्तौ लोकाअपिसुखातिरस्यतयास्वेच्छया धर्मेप्रवृत्ताः अतिदुःसाध्येष्वेव लोकोपदेशनिमित्तं तेषां प्रवृत्तिः यदाह ४२
स्कांदे अल्पसाध्येपिदुःसाध्यं श्रावयेत् सततंजने यथापापेनवर्त्तेरन् प्रायश्चित्तभयादिति तथा ननिर्दिशेदल्पसा
ध्यं प्रायश्चित्तांतरे बुधः तस्मिन् संक्रमते पापं कर्त्तातत्रावमुच्यत इति तन्न लोलनिवर्त्तनं हि तेषां स्वसमानकाले वा अ
न्यदा वा नाद्यः दंडस्यैव तन्निवारणसामर्थ्यात् नद्वितीयः तदाहि रामप्रभृतीनामाचारस्मरणं गंगास्नानादिनैव
ब्रह्मवधादि सर्वपापनिवृत्तिरित्यर्थप्रतिपादकानि बहूनि परमर्षिवचांसि संति तत्राचारस्यान्यथासिद्धिशंकाकवलि
तततयावचसामेव बलवत्त्वादिति अत्रोच्यते समर्थेन प्रायश्चित्तत्वेन व्रतमाचरणीयं तदसामर्थ्ये दानं तदसामर्थ्ये ज ४२
पहोमादि तदसामर्थ्ये गंगादितीर्थानुस्मरणं कर्त्तव्यं अतएव हलायुधभट्टाः अत्र प्रायश्चित्तभेद इत्युपक्रम्य

ख्यापनेनानुतापेन तपसाध्ययनेन च पापकृन्मुच्यते पापात्तथा दानेन चापदि प्रोषणेन शरीरस्य तपसाध्ययनेन च पापकृ
न्मुच्यते पापधर्मेण च दमेन च अवरोधः परित्यागस्तपो दानानुकीर्तनं विद्याभ्यासो ह्युपांस्पर्शः सप्तांगं पापनाशनं ध्याने
न सदृशं नास्ति प्रोधनं पापव...णां स्वपाकेष्वपि भुंजानो ध्यायी नो वर्वलिप्यते प्राणायामैः पवित्रैश्च ज्ञानैर्होमैर्जपैस्त
था शुचिकामाः प्रमुच्यन्ते पातकेभ्यो हि सर्वशः प्रातर्निष्प्रितथा संध्यामध्याह्नादिषु संस्मरन् नयाति नरकं शुद्धः सं
क्षीणाखिलकल्मषाः पापकार्ये शतं कृत्वा कृतं गंगाभिषेचनं सर्वं दहति गंगोभस्तत्तूलराशिमिवानलः तथा रामेश्वसे
तुबंधमस्ता वे ब्रह्महत्यादिपापानि नराणां यानि कानि ह दर्शनादेव नश्यन्ति नात्र कार्यविचारणा हिरण्यदाने गोदानं भू
मिदानं तथैव च नाशयत्याशु पापानि महापातकिनामपि दानैर्होमैर्जपैर्नित्यं प्राणायामैर्द्विजोत्तमाः पातकेभ्यः प्रमुच्यं
ते वेदाभ्यासान्न संशयः एते द्विजातयः शोध्या व्रतैराविष्कृतैनसः अनाविः कृतपापांश्च मंत्रैर्होमैश्च शोधयेत् इत्यादी
नि बहूनि परमर्षिवचांसि च पठित्वा तद्दिह व्रतकरणासमर्थेन व्रतमाचरणीयं तदसंभवे मीमांसावचनपरिशिष्टि[illegible]नि
चांद्रायणादिव्रतसमानि धेनुसुवर्णादीनि कृतद्रव्याणि देयानि तदसंभवे जपहोमादीनि क्वचित् क्वचित्तदसंभवे तीर्थ
सेवनं अतो विपापास्तु प्राधान्यतया एवं जपहोमादयो विधेया इति व्यवस्थां कृतवंतः वस्तुतस्तु गंगासन्निहितदेशे शि
ष्टानां यत्नो विशेषाकांक्षिणामेवा तत्तत्प्रायश्चित्ते प्रवृत्तिरस्तु तत्तत्प्रायश्चित्तानां प्रायश्चित्तैरपेत्ये नो ध्रुवस्वर्गं च विं
दति दीनात्मानस्तु पापेभ्यो कृच्छैः संतापिता नराः गतपापा दिवं यांति नात्र कार्यविचारणा शंखलिखितौ प्रायश्चित्तं

प्रशंसंति रसज्ञानविचक्षणाः, सर्वैः सुखोपपन्नास्ते एवं ह्या पुरातनाः ज्ञानवान् यशसायुक्तो जायते ग्रकुलोचितः धूतपा
पोऽकृतो जितक्रोधः सत्यवादी जितेंद्रियः इत्यादिना पापनाशकत्वस्य यशो विशेषजनकत्वस्य स्वर्गविशेषजनकत्व
४४ स्य च श्रवणात् रामयुधिष्ठिरप्रभृतीनां फलविशेषकांक्षयापि तत्र प्रवृत्तिरुपपद्यते एवं च निःप्रपंचेषु ब्रह्मबधा
द्युपपापप्रतिपक्षे दर्शकवाक्येषु किमर्थं सकाचकल्पना अश्वमेधगंगास्नानयोस्तु फलभूमैव कल्प्यतां आधिक्यं
तु परब्रह्मस्वरूपायां गंगायां स्नानादौ अश्वमेधादौ प्रकरणस्य यशो विशेषाकांक्षत्वात् यत्तु नरकेणोपापसाध्यदुः
खानुभवात्सर्वपापक्षय इत्यस्य सर्वजातीयपापक्षये इत्यर्थे इतिदं तदपि अयुक्तं एवं हि विद्यमानशरीरेपि भोग्यदुःख
ग धर्मभिन्नाधर्मनाश इत्येव किं न कल्प्यते तत्तद्धर्माद्दु शरीरेणावश्यं तत्तत्फलोपभोगात् अतएव लीलावतीकृत
मुक्तिग्रंथे देहांतरे कर्मभोग्यैकनाश्यत्वनियमादिति सिद्धवल्लिखितं अतएव श्रीदत्तहरिनाथोपाध्यायाभ्यामेकादशी
प्रकरणे सर्वपा

येऽप्यनुच्यते ऽल्पस्थानमुक्तिः नचैवं सद्य एव शरीरपातापत्तिः एतत्कुरीरोपभोगपापभिन्नपापस्योत्पत्तेः
नच स्नानानन्तरं पुनः पापक्षयार्थं स्नानानन्तरं पुनः पापक्षयार्थं स्नानानन्तरमेवेत्यनुपपत्तिः नहि पापक्षयार्थं
मुमुक्षोः स्नाने प्रवृत्तिः किं तर्हि स्वर्गाद्यर्थमेव स्नानानन्तरोपपन्नानां धर्मनाशार्थं वा प्रवृत्तिः मुक्तिप्रतिपादकवाक्यानां
तु किमर्थं संवादकत्वमिति चेत् आरादुपकारकं कर्म सन्निपत्योपकारकं ज्ञानं तथा च तत्त्वज्ञानप्रतिबन्धकीभूतदुरितोप
शमद्वारा गङ्गास्नानमरणादीनां मुक्तिहेतुत्वं तेन च स्नानमरणादीनां दुरितोपशमो भवत्येव कारणान्तरविलम्बात्
विलम्बः यथाङ्कुराद्यर्थं चरणाः नचैवमेकमप्येकस्माद्भवति सामग्रीतः सर्वसम्भव इति नपुनरेतावतैव संन्यासा
श्रमे मरणादौ च प्रवृत्त्यनुपपत्तिः श्राद्धकृत्सत्यवादी च गृहस्थोऽपि विमुच्यत इत्यादिना श्राद्धादीनामपि मोक्षहेतु
त्वश्रुतेः श्रवणमननादिश्रवणमननोः प्रवृत्त्यनुपपत्त्यापत्तेः तस्माद्गङ्गास्नानादिना तत्त्वज्ञानप्रतिबन्धकीभूतदुरितो
पशमे [illegible] तत्त्वज्ञानकारणीतरात [illegible] तत्परमं ब्रह्म [illegible] यपामितवानघेत्यादिवाक्योधितोपदेश्याद्वा तत्त्वज्ञानोत्पत्तौ
मिथ्याज्ञानाद्युपशमे मुक्तिरिति सर्वमवदातमिति अथ तत्रैव सकृदिति संशयस्तत्र [illegible] अत्र केचित् आव
र्तनमेव स्नानमावृत्तं तथा च देवलवचनात् पादस्पर्शनमभिसंधाय पापकर्मसमर्जितं तस्यैपनिष्कृतिः प्रोक्ता
धर्मविद्भिर्मनीषिभिः विधिप्राप्यमिह कस्मिन् द्वितीये द्विगुणं स्मृतं तृतीये त्रिगुणं प्रोक्तं चतुर्थे नास्ति निष्कृतिः
इति गोतमोऽप्याह एनसि गुरुणि गुरूणि लघुनि लघूनि तेन पापसंख्यानुरोधेन [illegible] प्रायश्चित्तानि सकृ
त्स्नानाद्येनस्य [illegible] नीति तन्न तत्रैव सकृत्स्नानादेव सकलपापक्षयसिद्धेः [illegible] अनुष्ठानवैयर्थ्यात्
[illegible] प्रयोगविधिपरिगृहीतत्वं वा समानकालदेशकर्तृत्वं वा तच्चोभयमपि गङ्गास्नाने संभवतीति कथं न तं
त्रत्वं नन्वेकस्य प्रधानानुष्ठानस्य युगपदेकफलत्वं योगसिद्ध्यधिकरणे निर्णीतं कथमेकस्नानस्य युगपदनेक
पापक्षयकारित्वं भविष्यतीति चेत् नैवं योगसिद्ध्यधिकरणसिद्धान्तोऽपरिज्ञानात् तत्र हि पृथगनुष्ठानसाध्याने
कफलानेकसेकमेव कामायपश्चानेकपदान् [illegible] इति संकीर्त्यते सर्वेभ्यो दर्शपौर्णमासावित्यभिधानात् तत्र भवतु

पृथगनुष्ठानसाध्यत्वं इहतु तथाभूतपृथगनुष्ठानसाध्यत्वप्रतिपादकवचनाभावात् अनेकफलानां हि शाहृत्यापा
येन एककामनाविषयत्वं संभवा त्तंत्रत्वमिति नचैवमनेकप्रयोगसाध्यानां षष्ठिवर्षाद्युपभोग्यसज्जातीयानामने
कफलानामेकस्मात्तंत्रानुष्ठितप्रयोगाद्येकदेशसकलनिष्पत्तिसंभवात् पुनरनुष्ठानं न स्यात्
इति कर्मैक्यारंभारंभाधिकरणसिद्धान्तविरोध इति वाच्यं यतो हि भवेदेव यदि षष्ट्यादिसंख्यावच्छिन्नफलस्य
तिविरोधो न भवेत् तथा हि यद्येकस्मिन् प्रयोगे षष्ठिवर्षभोग्यानेकानि फलानि भवेयुः तदा षष्ठिवर्षभोग्यकाल
स्यानिरवनस्यात् श्रूयते च तेनावगम्यते प्रयोगभेदाद्देवफलभेदसिद्धिः यत्तु स्थलवचनं विधेः प्राप्यमिदं क
मित्यादि तत्रावद्वत्तानुष्ठानप्रतिपादनार्थं किंतु द्विगुणत्रिगुणप्रायश्चित्ताभिधानाद्वारेण पुनः पुनः
४५ रनुष्ठानानामधिकपापजनकतयानिरासार्थमेव तथा चोक्तं चतुर्थे नास्ति निष्कृतिरिति न तु परमार्थतश्चतु
र्थे निष्कृत्यभावः महापातके पि द्वादशवार्षिकप्रायश्चित्तोपदेशात् कामतो पि ब्रह्मवधे प्राणान्तिकाद्यातिदे
शोपदेशात् अतो नार्थविधिः किंतु निरासार्थवाद एव अत एव तुल्यरूपपापेषु महापापातिदेशेन प्रवृत्तद्वादश ४५
वार्षिकादिप्रायश्चित्ते कृते स्वल्पपापानां पश्चात्पुरोऽशत्याप्यनेन प्रसंगाद्विनाश इति न पृथगपापस्य पार्थप्राय
श्चित्तानुकरणं तद्वदेकेनैव स्नानेन सकलपापनिवृत्तिर्न तत्र तदर्थस्नानान्तरकरणमिति सर्वत्र सामित्याष
एव संकल्प इति सिद्धं प्रकृताधिकरणे मासपक्षतिथीनां च निमित्तानां च सर्वशोऽनुल्लेखनमकुर्वाणो न त
स्य फलभाग्भवेत् इत्यादित्वात्कालस्वरसात्सर्वसंकल्पवाक्येषु मासपक्षतिथीनां निमित्तविशेषोपनिपाते तन्निमि
त्तोल्लेखः कर्तव्यः तथा च साधारणदिने अद्य चैत्रशुक्लतृतीयायाममुकयज्ञजन्यफलसमफलप्राप्ति
कामः स्यादिक्रमेण निमित्तोपनिपाते च शुक्लप्रतिपदिने यामित्यादिक्रमेण संकल्पवाक्यमिति यत्रा
करवाक्ये मासपक्षतिथीनां निमित्तत्वं प्रतीयते तत्रैवतेषामुल्लेखः अन्यत्र तु अद्य नंदायामित्यादिक्रमेण

संकल्पवाक्यमिति यत्राकरवाक्ये मासपक्षतिथीनां निमित्तत्वं प्रतीयेत तत्रैव तेषामुल्लेखः। अन्यत्र तु अयनस्व
पामित्यादिक्रमेण निमित्तमात्रस्येति परेषाम[त] तत्र त्र्यकाररूपस्य समुच्चयपार्थकल्पे प्रथम एव पक्षः। वाचस्प
तिविकल्पपरतया तु द्वितीयः पक्षः। प्रतिहस्तकचरणे करांगापद्म । लके द्वितीय एव पक्षो बहुलोल्लिखित। त्रिमि
त्वा नाम्ना चारस्तस्या गोडास्त्वधिकराशि दिवाधकोजं नम्यापि कुं तिले च प्रमाणाभावान्नादरणीया मि
ति कामनायां तु सर्वत्रैकरवा द्वेषे न प्रकारेण यत्फलं श्रुतं तेन विरोधात् उल्लेखनीयं न च वेदादिबोधि
तफलप्राप्तिकाम इत्यादिक्रमेणापि वाक्यरचनमिति भ्रमः कर्त्तव्यः। यथाश्रु तिविहारद ल्लिखे निरन्वयस्त्व च वि
रोधात् विस्तुर्यीनिस्तु सर्वत्र कामनाविषयी कर्त्तुं युज्यत एव सर्वत्र विस्तुर्यी तिर्वा फलमिति परमशिष्ट
श्रीदत्तोपाध्याया पगच्छोतनरी रत्नलिखितवाक्य सम्प्रदायः। ननु स्नानेदर्शनादो तु एवकालस्नाने नस्तु
तिवृत्तणादि भेदेन फलभेदः श्रूयते तत्राविरोधासर्वफलं जायतां विरोध तु परं ब्रह्मरूपिण्या गंगास्त्व
यामसंभवः। न हि स्वर्गमोक्षौ विरुद्धौ धाकारक देयापि गंगापा रूपे ते स्वर्गं मोक्षसेय च स
कलप्रवाक्ये अनन्तरपदं दर्शितामि पिसकलमुनिप्रणीतफलभावश्च तदुक्तरीत्या सर्वपापनपवत्त्व म
तएव पत्रैव परस्परमाकांक्षातेरनानामुनिप्रणीतवाक्यैकवाक्यतयाएकः श्राद्धपिप्पयोगा निर्वाहितेः
पत्रैवनाकांक्षा तत्र प्रयोगभेदः कातीयगोभिलस्नानवत अन्यथा। ताभ्यामप्येकवचनापत्तेरित्यर्थः
अतएव परममीमांसकैः प्राचीनैर्भवशर्मप्रतिहस्तकप्रभातिमिरकैककमेव फलं भवतीति संकल्पवा
क्यतयैव लिखितं अतएवैकस्मिन्नहनि निमित्तद्वयापनिपाते द्वयारापितिमित्तद्वयमुल्लिख्य फलद्वय
वोल्लिख्य फलद्वयं चोल्लिख्य संकल्प्योति गोडानाम्ना वाराणपितये शेति निरस्तं एकस्नाने फलद्वयं बद्धा

नावलाघवाभावेत तंत्रेणवाभवेत नाद्यः निरपेक्षत्वात्तत्वेनाकांक्षाविरहेण वचनस्यतत्रासमर्थत्वात् न
द्वितीयः समानदेशकालकर्तृत्वेनाप्रसमानविशेषत्वस्यात्तंत्रतत्प्रयोजकस्याविरहात् अतएवमेघिला
नामाचारोपितथैवेति तिथिपुरस्कारेणनिमित्तविशेषोपनिपातेनुदयगामिन्येवतिथिः साहरणी
देवेवारूपकीतिथिरितिनिबन्धनात्स्मरणात् । ननुयुग्मादिरूपस्यव्रतमात्रप्रकरणिकत्वात् नाति
तिथ्यवच्छिन्नकालमात्रादरः निषिद्धकालवर्जनमितिपर्यवसितं द्विनेमासादिविधएववचनबलात् प्र
वंचनतत्रपुरस्कारस्तत्र ततनिमित्तविशेषोपपुदयकालीनत्वमात्रादरएवन्यायस्यसाम्यादितिश्रीदत्तोपा
ध्यायाः एवंचयद्यपिश्रीदत्तोपाध्यायाः पंचतिथिनतत्रयोगाद्वारसोनिमित्तविशेषस्तत्रदुपयोग्य
उदयकालीनत्वमपेक्षणीयंभवितुमर्हति ननुद्वितीययोगमात्रंनिषिध्यते नतुभयं नाद्यंतयोरस्तुदयो
रप्युदयकालीनत्वमपेक्षणीयमितियोगेपिदमारूप्ययोगोपपन्नः तथापियोगेयोगमात्रमपेक्षणी
यमाचारात् अतएवगाडक्षायाहतथाव्यवहारइति यद्यपुनर्विहितसमयः सांगस्नाननिर्वाहक्षमो
न किंतुस्वल्पसमयावच्छिन्नस्तहिनदर्शतरएवारम्भकालांतरेपिनिर्वाह्यकिंत्वेकत्र समारब्धस्यस
कालेसमापयेदित्यादिइति चाभ्युदितेपरोसिद्धमिति माघादौमासस्नानमुद्दिश्यप्रथमदिनेसंकल्पवसंक
ल्पावारणंननुएवंकृपर्यवसायित्रिमरणाभावाविरोधाच्च प्रत्याहिकस्नानेनकलिकापूर्वजन्यते चरम
स्नानेतुमासांतेऽपितत्फलजननसमर्थप्रधानापूर्वंजन्यते नतुप्रत्याहिकस्नानेनकलिकापूर्वप्रत्याहिक
फलजननसमर्थप्रधानापूर्वंचजननीयमितिवाच्यं योगसिद्धाधिकरणाविरोधात् समानदेशकालकर्तृ
त्वेनाप्यसमानविरोधकत्वस्यतंत्रत्वप्रयोजकस्याविरहेणतंत्रस्याप्यभावात् तथाचयदिमासफलकामना

स्तर्हि प्रातः प्रत्यहं संकल्पो न कर्त्तव्यः प्रातःस्नानमुपक्रम्यैव मासफलश्रवणादित्युक्तमधस्तात् एवं चम
ध्यंदिने निमित्ते नैव विशेषोपनिपाते संकल्प्योऽस्य तन्मासफलेतत् संस्पर्शात् एवं च पक्षमासस्नानेपीति अ
मावास्यादू पंचविंशको तिवर्ज्जं मासि मलिम्लुचः स विज्ञेयो ऽन्यो नहि, सर्वकर्मस्थिताविति वैदिककर्ममात्रत्यागेनिषेधप्र
त्र नित्यनैमित्तिके कुर्यात् प्रयतः सन् मलिम्लुचे तीर्थस्नानं गजच्छायां प्रेतश्राद्धं तथैव च इति प्रसवात् म
लिम्लुचेत्वनाद्युक्ततीर्थस्नानमपि त्यजेदिति पुनर्निषेधप्रसादयं पर्यवसितार्थः तीर्थस्नानाविनाहृदेवक्व
नैमंत्रादि दवे स्नाने हूयते वह्निजीविषु परिहरेदस्तंगते भौमे गवे तथा मलिम्लुचे मासि सुरार्चापि चेत्तथा
गते इति ज्योतिर्विवचनं प्रतीतमप्यशुभजनकमात्रं तीर्थस्नाने पर्युदस्यते काम्यफलाजनकत्वेत्वाद्युक्ता
नाद्युक्ततीर्थस्नानादौ सर्वत्रैवं मलिम्लुचः सर्वत्र ज्ञेयः कर्मणां फलनाशकृत् इत्यादिना काम्यफलम
स्पगोदानादिवन्निषेधात् तीर्थस्नानं गङ्गायामित्यादि प्रतिप्रसवस्यानिष्टाजनकत्वेनापि संभवा
अनाद्युक्तेत्वानिष्टजनकत्वमपि अत एव मलिम्लुचपरित्यागस्त्वदृष्टार्थो दृष्टानुरूपार्थो न हि सर्वकर्म
इत्यभिधानात् ज्योतिःशास्त्रनिबन्धे निषिद्धमुक्तस्नानादि समयेमहादानाद्यपूर्वमुत्पद्यत एवेत्यादि
महादाननिर्णये प्रतिहस्तकचरणैः स्फुटं निगदितं नवीनवाचस्पतिमिश्रैरपि द्वैतनिर्णये पञ्चाद्युक्ताना
द्युक्तसाधारणे तीर्थस्नाने गोदानादिनादितत्पुण्यजनकवचनात्तयोरसिद्ध एवं मलिम्लुचः आवृत्त
अनिष्टजनकत्वमपीत्यभिधीयते तीर्थस्नानं गङ्गायामित्यादिना अनाद्युक्ततीर्थस्नानवत्तद्दृष्ट
दोषानभवतीत्यभिधीयते नतु काम्यफलजनकत्वमपीति सिद्धवल्लिखितं दानरत्नाकरस्याप्ययमेव
तात्पर्यमिति कृत्ययोगपरिशिष्टे यथाह नित्यं प्रातर्नित्यं स्नायादनातुरः दन्तान् प्रक्षाल्य नद्यादौ गेहे
चेत्तदमन्त्रवत् अनातुरः स्नानसंवर्द्धनीपरोगरहितः गेह इति मुख्यापरार्थः इति व्याख्यातं प्रतिहस्त

किंच किंभिदं तन्निमापन्नं नामननतार ङ्गगायां मूर्वव्हमतमान्स्नगमनं वा भवेत् नापिप्रमाणिशीर्भादेवताभ्याः सन्निमानं न तस्मा
दीतितादि कथरतोः उद्धृतोदकस्नानमाध्यपरमितिकिंचीदत्रोपाध्यायाः साग्न्यनुदितहोमिनोप्रातःस्नानप
रंगेहपदं सहिपदिहोमन्तोपेसतु यो गेहे स्नाति तत्र सर्वत्र न्येस्नापादिति हलायुधहरिनाथकृत्य
तत्त्वकृतां सुरसः तत्र ख्यनुद्धृते वीजलैः स्नानं समाचरेदित्युपक्रम्य पद्मपुराणे विष्णोः पादप्रसू
तासि वैष्णवी विष्णुपूजिते त्यादिस्नानप्रकारस्यकथनान्मध्यमः पक्षः सर्व चिंतनीयः संकोचेऽप्रमा
णाविरहात् चरमोपि चिंत्यः प्रथम एव पक्षः साधीमान् सावकाशस्य कुलाचारात् त्रिघपि साधारण
त्वादिति आवाहनं विसर्जनं च गंगास्नाने न विधत्त इत्यावाहनादीनि वेधात् भवेत्सान्निहितालवगं
४१ गात्रिपथगामिनीइत्यानेनसन्निधापनफलकत्वस्याश्रूयमाणत्वात् गंगायां विष्णोः पादप्रसूतेत्या ४१
दिनावाहनमितिकथं सिद्धवल्लिरिवितमिति चेत् अनुद्धृतैरनुद्धृतैर्वा जलैः स्नानं समाचरेदित्युपक्र
म्यसर्वत्र जले विष्णोरितिमंत्रपाठाद्गंगायामपि तदन्वयात् स्नाने हि करणत्वे न मंत्रान्वयात्
अंगेफलश्रुतिरर्थवाद इतिन्यायात् भवेत्सान्निहितात्र इत्यादिमीमांसकनयेस्तावकतावच्च

किंचक्रिमिदं सन्निधापनं नाम न तादृक् गायाः पूर्वरूपतया तत्रागमनं वा भात् नापि पूराधिष्ठात्र्यदेवतायाः सन्निधापनं
तस्मात्प्रतिष्ठाविधिनाप्रतिमाधिष्ठानदेवतायाः सान्निध्यं वाद्यं तत्र गंगायामपि नायोग्यं अस्तु वापि पथ्यागामिप्रवाहयत्राधि
करणस्नानजन्यफलजनकमिति न किंचिदनुपपन्नं इह तर्पणं द्विविधं प्रधानमंगं च तत्र प्रधानतर्पणं तु शुचिः कुर्या
दहरहः स्नातको द्विजः देवेभ्यश्च ऋषिभ्यश्च पितृभ्यश्च यथाक्रममिति शातातपोक्तं द्वितीयं तु नित्यं नैमित्तिकं काम्यं
त्रिविधं स्नानमुच्यते तर्पणं तु भवेत्तस्य अंगत्वेन प्रकीर्तितमिति ब्रह्मपुराणोक्तं तत्र गेहादावसंभवक स्नानपक्षे अंगि
नोऽभावादंगस्यापि असत्केः प्रधानमेव तर्पणमुचितमिति सर्वतंत्रिकः सिद्धः तत्र उदास्तेति प्रथमांजलिं अंगिरस्योन इति द्वि
तीयांजलिं आयांतु न इति तृतीयांजलिं पितृभ्यः ऊर्जं वहंतीरिति प्रथमांजलिं पितृभ्यः स्वधायिभ्यः द्वितीयांजलिं येचेह
पितर इति तृतीयांजलिं पितामहाय मधुवातेति प्रथमांजलिं मधुनक्तमिति द्वितीयांजलिं मधुमान्नोवनस्पतीति ति
ति तृतीयांजलिं प्रपितामहाय सवाक्यं नमो व इति वाक्येन प्रथमं केवलवाक्याभ्यां च द्वितीयं मातामहाय एवमेव प्रमातामहयो
रपि दद्यादिति एवं चैवंविधस्नानव्यतिरेकेन नित्यतर्पणे देवास्तृप्यंतामिति त्रिः ऋषयस्तृप्यंतामिति त्रिः प्रजापतयस्तृप्यंता
मिति विधाम अयमेव प्रकारः पद्मपुराणीस्नानांगे पितृतर्पणे उशीरितत्यादिमंत्रान्वय इति वर्द्धमानोपाध्यायप्रभृतयः त
थादि विना रूप्यसुवर्णाभ्यां विना ताम्रतिलैस्तथा विना दर्भैर्विना मंत्रैः पितृणां नोपतिष्ठते इत्यादि दर्भो द्विवत्सर्वमंत्रा
न्वयैर्विधीयेत मंत्रैर्विनानिंदार्थवादात् अपरे तु यदैकस्नानमुपक्रम्य यत्तर्पणं पठितं तत्र त्रांगं अन्यथा परत्वमन्याय इ
ति वदंति तदनयोः पक्षयोरुभयत्रापि कुलक्रमेणाचार इति तथाचारमेव व्यवहर्तुमर्हतीति तीर्थेशराड्करणे गंगायाश्च

वाहावधिहस्तचतुष्टयाभ्यंतर एव परमिरसंन्नमेतद्भूस्वामि तभ्यइतिनकर्तव्यं अन्यतीर्थांतरेकार्यमिति केचित् तन्न अटवीप
र्वताः पुण्याः पुण्यतीर्थान्यायतनिच सर्वाण्यस्वामिकान्याहुर्न तेष्वस्ति परिग्रह इति तीर्थमात्रस्यैवास्वामिकत्वात् तत्र नारा
यणः स्वामीत्यस्यापि नाशायणाधिकरणमात्रमर्थ इत्युक्तत्वादिति आचारस्त्वत्रापि द्विविध एवेति यावंति नखलोमानि
वायुनाशेरितानि वैः पतंति जाह्नवीतोये नराणां पुण्यकर्मणां तावद्वर्षसहस्राणि स्वर्गलोके महीयते केशानां यावती संख्या
छिन्नानां जाह्नवीजले तावद्वर्षसहस्राणि स्वर्गलोके महीयते इत्यादि विशेषश्रवणात् मुंडनं चोपवासश्च सर्वतीर्थेष्व
४९ यं विधिरिति सामान्यतः श्रवणात् गंगायामपि वपनमिति अतएव कामरूपिणां दाक्षिणात्यानां च तथैव व्यवहार इ
ति केचित् तन्न मुंडनं चोपवासश्च सर्वतीर्थेष्वयं विधिरित्यस्यापि भास्कर वर्जयित्वा गयां गंगां विशालां विरजां तथा इति
शिष्टपरिगृहीतवचनविरोधात् गंगायां भास्करक्षेत्राबन्न गंगायामेव वपनविधानात् अन्यथा षड्वित्यनुपपत्तेः एतद्वच
निकमूलतया सर्वतीर्थेष्वयं विधिरित्यस्यापि भास्करक्षेत्रावच्छिन्नदेशपरत्वात् नच तर्हि वर्जयित्वा गयां गंगामित्या
द्यनन्वयतत्रा ऽप्रसक्तेरिति वाच्यं यद्दैर्यजेत ब्रीहिभिर्वा यजेतेत्युत्पत्तिवाक्यानंतरं अयज्ञिया वै माषा इति वदनिषेधस्य तत्वेता
त्पर्यात् केशानां यावती संख्येत्यादिवचनानामपि प्रयागमात्रपरत्वात् वर्जयित्वा गयां गंगामित्यादिना ऽन्यत्र वि ४९
शेषादिति वाचस्पतिमिश्राः कामरूपिनिबंधे दाक्षिणात्यनिबंधे च विवर्जयित्वा कुरुक्षेत्रं विशालां विरजां गयामिति
दृश्यते तथा केशानां यावती संख्येत्यादिवचनानां संकोचे मानविरहात् गंगायां सर्वत्र मुंडनं अतएव स्करक्षेत्रे शक
लदेशीया मुंडनं कारयंतीति वैदेशिकाः गंगायालक्षणं तु हिमवन्नः सतित्वे सति भगीरथरथमात्रप्रवृत्तत्वे च सति स २

शात्सागरगामित्वं यद्वागंगात्वंजलप्रवृत्तिप्रवाहविशेषनिष्ठाजातिः एवंचत्रिपथगामिरश्मीश्चीर्ह्लिकनंदादिभिन्नानांचा
नुगतोगंगाकारप्रत्ययः तच्चगुणविशेषजनकत्वाभिव्यंजकरसविशेषाभिव्यंग्यत्वं अतएवजलांतरसंवंधेसंसर्गिद्व्यत
याखननादिनाजलाहरणेयाप्रवाहांतरोत्पत्तावपिजातिविशेषसत्वान्नगंगात्वहानिः प्रवाहाद्धि हि षृतेतुगंगा॰ जल
त्वेनजलांतरसंवंधेसंसर्गिद्व्यतयाजलांतरेणनवमुत्पद्यतइतितन्नगंगाजलं किंतुलक्षणोपादानेगंगाजलत्वंवर्त्ततइतिजला
तरापेक्षयापवित्रमितिदिक् गंगातोनिः सृतंतोयंपुनर्गंगांनगच्छति अपेयंतद्विजातीनांपीत्वाचांद्रायणंचरेत् अग्राह्या
श्चतथैवापोनद्याःप्रथमवेगिताः यं प्रक्षोनिताश्चतोयेनयाश्चतीर्थेद्विर्गताः गंगादिप्रवाहा न्नेनद्यंतिरिताःप्रथमं
तीर्थजलंतृवर्ज्जितं विषयाइति ॥ ॥इतिगंगाभक्तितरंगिन्यांद्वितीयस्तरंगः ॥ ॥ शिवः सवम् गंगायांस्नाननिषेधवा
कर्के कर्कटेप्रथमेभागेअहंगंगारजस्वलावतुर्थेहनिसंप्राप्तेशुद्धाभवतिजाह्नवी आषाढीमवधिंकृत्वा अहंगंगारजस्वला
अन्यासुवहानद्यः करतोयांबुवाहिनीप्रणिधानग्राह्योह्योप्रायुक्तोतदिहसंप्रतितरंगोपदिचीयवर्णमात्रंभगवत्यांभक्ति
॰भावनुतत् ब्राह्मे अद्यमातृपितृदारकुलकोद्युधिकसंसारसंतरणकामोवागंगाभक्तिमहंकरिष्ये भविष्ये अद्यदशकुल
संतरणकामोर्कदाद्द्यामिकदास्नानंलभेमहीतिगंगायांमभिलाषमहंकरिष्ये हरिवंशे अद्यसर्वाघविनाशकामोगंगा
यास्मरणमहंकरिष्ये ब्राह्मे अद्यसप्तावरसप्तपरतत्परपितृसंतरणकामोगंगायात्रामहंकरिष्येइति भविष्यपुराणे
यं अन्यद्वाप्रयाणसंकल्पंकृत्वा अद्यतीर्थयात्रानिमिकगणेशपूजनमहंकरिष्येइतिसंकल्प्यगणेशंभक्त्यासंपूज्य अद्यती
र्थयात्रानिमित्तकदेवपूजनमहंकरिष्यइतिसंकल्प्यदेवान् संपूज्य अद्यतीर्थयात्रानिमित्तकब्राह्मणपूजनमहंकरिष्यइ

तिसंकल्प्यब्राह्मणान्संपूज्य अद्यतीर्थयात्रानिमित्तकपार्वणश्राद्धमहंकरिष्य इति संकल्प्याह विधापार्वणश्राद्धं कृत्वाप्रतिनिद
त्पुनः पूर्ववद्देवपितृब्राह्मणान्पूजयेत् अद्यतीर्थप्रत्यागमननिमित्तकदेवपूजनमहं करिष्य इत्यादिक्रमेण संकल्प्य इति
वृद्धे अद्यज्ञानैश्वर्यायुःप्रतिष्ठासर्वसाम्यताशुभाशुयत्वप्राप्तिकामो गंगादर्शनमहं करिष्ये भविष्ये अद्यसर्वदोषप्रश
नकामो गंगामहंस्पृशामि तथा अद्यब्रह्महत्यादिदोषशमनकामो गंगां स्नानार्थं प्रविशामि विष्णुपुराणे अद्यसद्यः
४२ पापप्रणाशाय पूर्वपुण्यप्राप्तिकामो गंगां गां स्नानमहं करिष्ये अद्य अश्वमेधयज्ञजन्यफलसमफलप्राप्तिकामो गंगायां
प्रातः स्नानमहं करिष्ये रात्रौ मध्याह्नव्यतिरिक्ते दिवा गृहे उद्धृतजलस्नानमहं करिष्ये रात्रौ तु अद्य स्याने अस्यां रात्रावि
तिवक्तव्यं भविष्ये अद्य प्रातःकालीनगंगास्नानजन्यपुण्यशतगुणपुण्यप्राप्तिकामो गंगायां मध्याह्ने स्नानम
हं करिष्ये अद्य मम जन्मावच्छिन्नपतितान्नभक्षणपतितसंसर्गब्रह्महत्यादिपंचमहापातकानिर्वचनीयपापक्षयरजस्वला
स्पृष्टान्नभक्षणासततासत्यभाषण स्वर्णमणिरत्नापहरणसामान्यसकलवस्त्वपहरणसखिबंधुमित्रहिंसामातृहिंसादि
जनितमहारौरवादिदारुणयमकिंकरताडननिवारणजन्मकृतबाल्ययौवनवार्द्धकदशापापक्षयब्रह्मलोकाधिकरणकप
रमहंसदर्शनपूर्वकस्वाधीनचतुर्वेदब्राह्मणसंप्रदानककपिलधेनुलक्षदानजन्यफलसमफलप्राप्तिश्रीमन्नारायणदक्षि ४२
णभुजवासतदनंतरमर्त्यलोके मजन्मगुणाशुयत्व सर्वसुखभोगयशःप्राप्तिकामो नंदायां गंगास्नानमहं करिष्ये भविष्ये अद्या
ष्टमीद्वये चतुर्दशीद्वये अमावास्यायां च अष्टम्यां पर्वणि गंगास्नानजन्यपुण्यशतगुणपुण्यप्राप्तिकामो गंगायां स्नानम

हं करिष्ये स्कांदे पर्वसु अथामुकपर्वणि अनंतगुणफलप्राप्तिकामो गंगायां स्नानमहं करिष्ये दिनक्षये प्येतदेव फलं भविष्ये
अथ दिनक्षये सहस्र[?] गंगास्नानजन्यफलसमफलप्राप्तिकामो गंगायां स्नानमहं करिष्ये यमसंहितायां भौमवारचतु
र्दश्याममप्येवमेव फलं स्कांदे अथ सोमवासरयुक्तायां अमावास्यायां षष्टिजन्मसहस्रावच्छिन्नप्रतिजन्माक्षयधर्मप्राप्तिकामो
गंगायां स्नानमहं करिष्ये आदित्यवासरयुक्तसप्तम्यां भौमवासरयुक्तचतुर्थ्यां बृहस्पतिवासरयुक्ताष्टम्यामेतदेव फलं सूर्यवा
सरयुक्तशुक्लसप्तम्यां अथ विजयसप्तम्यां महापातकनाशकामो गंगायां प्रचेताः पूर्णिमामावास्ययोः पक्षांते यमदूतरा[?]
मनकामो गंगायां० भविष्ये अथामावास्यायां ब्रह्मसदनावाप्तिकामो गंगायां० गारुडे भविष्ययोः अथामावास्यायां
आजन्मदुःकृतनाशकामो गंगायां० पुष्ये जन्मनक्षत्रे व्यतीपाते सवैधृतौ एतदेव फलं ब्राह्मे अथ व्यतीपाते पुष्ये कुलको
टिसमुद्धरणकामो गंगायां० भविष्ये अथ जन्मनक्षत्रे आजन्मार्जितपापक्षयकामो गंगायां० तथा अथ जन्मनक्ष
त्रे कुलकोटिसमुद्धरणकामो गंगायां० स्कांदे शनिवारयुक्ताष्टम्यां सुगतिप्राप्तिकामो गंगायां ततः संहितायां० अथ भौम
वारयुतामावास्यायां गोसहस्रदानजन्यफलसमफलप्राप्तिकामो गंगायां मौनस्नानमहं करिष्ये ब्राह्मे अथ व्यतीपाते कुल
कोटिसमुद्धरणकामो गंगायां० भविष्ये अथ चतुर्दश्यां व्यतीपातयुक्तचंद्रमसि यत्र कुत्र मरणे पि गंगामरणजन्यफलस
मफलप्राप्तिकामो गंगायां तथा अथ शुवर्णर्क्षयुक्तद्वादश्यां दुर्लभफलप्राप्तिकामो गंगायां कृष्णाष्टमीयुक्ताद्रानि[?]
क्षत्रेपि तदेव फलं स्कंदमत्स्ययोः महापूर्णिमासु अथ महापूर्णिमायां पूर्णमास्यधिकरणकरणक गंगास्नानजन्यफले

दशगुणफलप्राप्तिकामो गंगायां० स्म.तो अक्षय्यफलप्राप्तिकामो गंगायां० इतिप्रतिमासनिमित्तानि अथ प्रतिनियतमा
[...]न्तानि अथ शनिवारयुक्तचैत्रपूर्णिमायां अश्वमेधादिपुण्यसमपुण्यप्राप्तिकामो गंगायां अर्कगुरुयोगेप्येतदेवफलं।
सनिमित्तो अथ वैशाखशुक्लतृतीयायां रोहिणीयुक्तायां कायिकवाचिकमानसदशविधपापक्षय अक्षय्यपुण्यप्राप्तिकामो गंगायां०
स्म अथ वैशाख्यां अनंतफलप्राप्तिकामो गंगायां दुर्लभफलकामो वा गारुडे। अथ ज्येष्ठशुक्लदशम्यां हस्तनक्षत्रयुक्तायां कायि
५३ कवाचिकमानसदशविधपापक्षयकामो गंगायां० गांगेये अथ ज्येष्ठशुक्लदशम्यां क्षितिसुतयुक्तायां हस्तनक्षत्रे दशविधपा
पक्षयशतगुणवाजिमेधाप्लुतजन्यफलसमफलप्राप्तिकामो गंगायां० अथ महाज्येष्ठ्यां अनंतपुण्यप्राप्तिकामो गंगायां पूर्वोक्त
म'हापातकनाशकामो गंगायां अथ आषाढपूर्णिमायामनंतपुण्यप्राप्तिकामो गंगायां अथ मासत्रयावच्छिन्नवैधनिरंतरगंगा
स्नानजन्यफलसमफलप्राप्तिकाम: आषाढमासं व्याप्य गंगायां अथ भाद्रशुक्लषष्ठ्यां पुण्यप्राप्तिपापनाशशिवप्रीतिशु
भप्राप्तिकामो गंगायां स्ना अथ कार्तिकशुक्लनवम्यां वैधनिरंतरसंवत्सरावच्छिन्नगंगास्नानजन्यफलसमफलप्राप्तिकामो गंगा
यां स्ना० अथ कार्तिक्यामनंतफलप्राप्तिकामो गंगायां महाकार्तिक्यधिकरणक गंगास्नानजन्यफलदशगुणफलप्राप्तिका
मो गंगायां अथ पुष्करयोगे दुर्लभफलप्राप्तिकामो गंगायां अथ आदिदैवनिरंतरमासचतुष्टयावच्छिन्नगंगास्नानजन्य
फलसमफलप्राप्तिकाम: कार्तिकमासं व्याप्य प्रातः स्नानमहं करिष्ये अथ पौषशुक्लाष्टम्यां महाभानौ बुद्धवारयो
गे एतद्योगाधिकरणकसामान्यजलस्नानफलकोटिगुणगंगास्नानजन्यफलसमफलप्राप्तिकामो गंगायां स्ना० अत्र महादे

वस्तुजातप्रधानमित्युक्तं अथ माघकृष्णाष्टम्यां सहस्रगुणगंगास्नानजन्यफलसमफलप्राप्तिकामो गंगायां स्ना० अथ मा
घकृष्णसप्तम्यां मरुणोदयवेलायां सूर्यग्रासावच्छिन्नसमनाधिकरणक गंगास्नानजन्यफलशतगुणकामो गंगायां स्ना० अ
थ माघशुक्लाष्टम्यां ज्ञोनक्षत्रयुक्तायां व्यतीपाते दुर्लभफलप्राप्तिकामः पूर्वजातिस्मरत्वकामो गंगायां स्ना० अथ महामाघ्यां
मासाधिकरणक गंगास्नानजन्यफलशतगुणफलप्राप्तिकामो गंगायां अथादि वैधनिरंतरमासचतुष्टयावच्छिन्नगंगा
(फलप्राप्तिकामो गंगायां० अथादि वैधनिरं) स्नानजन्यसमफलप्राप्तिकामो गंगायां माघमासं व्याप्य प्रातः स्नानमहं करिष्ये अ
थादि मगोत्रसहितसुचिरशक्रलोकवासपूर्वककल्पकोटिशतायुतब्रह्मपुरवासकामो माघमासं व्याप्य गंगायां स्ना० माघमा
सीयसमभ्यायेजलाधिकरणकस्नानजन्यफलकोटिगुणफलप्राप्तिकामो वा० चतुर्युगसहस्रावच्छिन्नसुरालयायतनकी
मर्त्तिवा प्रतिदिनसुवर्णसहस्रदानजन्यफलसमफलप्राप्तिकामो गंगायामिति वा अनड्वाह सहस्रदानजन्यफल
समफलकपिलायुतदानजन्यफलसमफलप्राप्तिकामो वा० अथ सकलमहापातकनाशकामो गोविंदद्वादश्यां गंगा
स्ना० अथादि मासत्रयावच्छिन्नवैधनिरंतरगंगास्नानजन्यफलसमफलप्राप्तिकामः फाल्गुनमासद्वयं व्याप्य गंगा
स्ना० अथ मधुकृष्णत्रयोदश्यां वारुणनक्षत्रयुक्तायां सूर्यग्रहावच्छिन्नसमयाधिकरणक गंगास्नानजन्य
फलप्राप्तिकामो गंगायां स्ना० इति प्रतिमासस्य निमित्तसंकल्पः अथादि चरसमयसगोत्रैर्जनसहि
ल्पकोटिशतायुतब्रह्मपुरवासकामो मासं व्याप्य गंगायां प्रातः स्ना० अथादि समस्तकुल

1061

समस्तभोगप्राप्तिपरार्द्धद्वितयावच्छिन्नविष्णुलोकमहितत्वकामो गंगायां षण्मासं व्याप्य नैरंतर्येण गं ... अथ प्रतिनियतमा ... प्येतदेव फलं ।
क्रोतिसंकल्प्य० अथ दक्षिणायनसंक्रान्त्यां गंगास्नानजन्यफलकोटिगुणफलप्राप्तिकामो गंगायां स्ना० वैधृत्यां ... गंगायां ...
वच्छिन्नगंगास्नानजन्यफलसमफलप्राप्तिकामो वा उत्तरायणेप्येवमेव फलं अथ धान्यविषुवन्मडासंक्रान्ति ...
वैधृति निरंतरं षण्मासावच्छिन्नगंगास्नानजन्यफलसमफलप्राप्तिकामो गंगायां स्ना० सहस्रगुणगंगास्नानजन्यफल ...
फलप्राप्तिकामो वायव्यविष्णवेप्येतदेव फलं अथ विष्णुपदीसंक्रान्त्यां लक्षगुणगंगास्नानजन्यफलसमफलप्राप्तिका
मो गंगायां स्ना० अथ षडशीतिसंक्रान्त्यां षडशीतिसहस्रगुणगंगास्नानजन्यफलसमफलप्राप्तिकामो गंगायां स्ना० अ
यपर्वविषुवन्महारविसंक्रान्त्यामनंतफलप्राप्तिकामो गंगायां स्नायां स्नानमहं करिष्ये धान्यविष्णवेप्येवं अथ ग्रहणे
अस्यां रात्रौ राहुग्रस्ते निशाकरे देकुलकोटिसमुद्धरणकामो गंगायां स्ना० सूर्यग्रस्तेप्येतदेव फलं ब्रह्मसदनावाप्तिर्वापि स्त्रीव
त्रिसकलतीर्थस्नानजन्यफलप्राप्तिकामो वा० अथ राहुग्रस्ते दिवाकरे दशकोटिगुणगंगास्नानजन्यफलसमफलप्राप्तिकामो
वा० चंद्रग्रहे सविधिगोकोटिसहस्रदानजन्यफलसमफलप्राप्तिकामो वा० सूर्यग्रहे सविधिशतकोटिमहसहस्रदानजन्य
फलसमफलप्राप्तिकामो वा० सूर्यवारे सूर्यग्रहे अथ सूर्यवारे राहुग्रस्ते दिवाकरे सूर्यग्रहावच्छिन्नसमयाधिकरणकगं
गास्नानजन्यफलकोटिगुणफलप्राप्तिकामो गंगायां स्ना० अस्यां रात्रौ चंद्रदिने राहुग्रस्ते निशाकरे चंद्रग्रहावच्छिन्नसमया
... गंगास्नानजन्यफलसमफलप्राप्तिकामो गंगायां स्ना० संक्रान्तिमंत्रे

विष्णुपदीसंक्रान्तिषु० अथामुकसंक्रान्त्यां वैधृतिनिरंतरमासचतुष्टयावच्छिन्नगंगास्नानजन्यफलसमफलप्राप्तिकामो गंगायां स्ना० संक्रान्तिमंत्रे